कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 1961 विषय पुराण
नाव. ज्येष्ठमहात्म्य (भविष्यपुराणे) अध्याय ३-३०.
लेखक/लिपीकार ?
पृष्ठ 36 काळ पृ०क्र १-३ गहाळ पूर्ण/[✓ अपूर्ण]

M-1961

M-1961

M-1961

ध्यितो किं पुनर्ह्रीतुमिच्छ्य ॥ तस्मात्सर्वप्रयत्नेन नरा नंदद्याद्दिने दिने ॥ ४ ॥ पाद्यश्चान्नं द्विजातिभ्यो देयं च दधिभो
जनं ॥ पादप्रक्षालनं कार्यं तस्मिन्मासे दिने दिने ॥ ५ ॥ सुगंधश्चंदनै[illegible] ॥ पअर्चयेद्द्विजपुंगवान् ॥ सुगंधपु
ष्पमालाभिः पानकैर्विविधैस्तथा ॥ ६ ॥ सौगंधिकैश्च व्यजनैर्वीजा[illegible]यमेव च ॥ एवं ये कुर्वते विप्राः प्रा
प्नुयुः परमां गतिं ॥ ७ ॥ इति श्रीभविष्यपुराणे ज्येष्ठमाहात्म्ये द्वितीयोध्यायः ॥ २ ॥ ॥ श्री ॥ स्कंद उवाच ॥ शृ
णुध्वं मुनयः सर्वे सर्वपापहरं शुभं ॥ ज्येष्ठस्य दिनमाहात्म्यं कथयामि यथातथं ॥ १ ॥ प्रतिपद्दिनमारभ्य याश्रु
क्लादशमी भवेत् ॥ तावद्वै तत्प्रकर्तव्यं पुण्यं दशहराभिधं ॥ २ ॥ स्नानं प्रतिदिनं कार्यं गंगायास्सलिले शुभे ॥
अभावे सर्वतीर्थेषु सर्वगंगासमं जलं ॥ ३ ॥ मुंचते दशभिः पापैः शतजन्मार्जितैरपि ॥ महापापानि पंचैव त
था पंचलघूनि च ॥ ४ ॥ एवं दशविधैः पापैर्मुक्तो भवति नान्यथा ॥ तत्रस्नानान्यनेकानि दत्ता निर्ध्यष्टतो व्रजेत् ॥ ५ ॥
तथा शुक्लद्वितीयायामपराह्ने द्विजोत्तमाः ॥ समानो नाम विख्यातः कल्पः प्रादुरभूत्किल ॥ ६ ॥ तत्र स्नानं च
दानं च श्राद्धं च द्विजतर्पणं ॥ विष्णुमुद्दिश्य पैभक्त्या कृतं कोटिगुणं भवेत् ॥ ७ ॥ तथा शुक्लतृतीयायां पंचा
ग्नीसाधनं व्रतं ॥ कृतं च मासमात्रं तु सर्वपापैः प्रमुच्यते ॥ ८ ॥ तेजसा सूर्यसंकाशो जायते नात्र संशयः ॥
अस्यामेव विशेषेण कार्यं रंभाव्रतं शुभं ॥ ९ ॥ सधवा विधवा स्त्रीभिः सौभाग्याप्त्यभुक्तये ॥ अस्मा

पे.ह॰ ४ मेवद्विजश्रेष्ठाकल्पोभद्रामनस्यच॥१०॥ दधिभक्तप्रदानेनतर्पणंद्विजभोजनं॥११॥ तथैवमासपर्यंतंद्वि-
जेभ्योदधिभोजनं॥ ज्येष्ठाशुक्लचतुर्थ्यांतुकपिलस्याश्रमेशुभे॥१२॥ कदाचित्तत्रभूद्देवोसिद्धिबुद्धिविनाय-
कः॥ अतस्तस्यांचकर्तव्योमहोत्साहःसदाजनैः॥१३॥ फंचम्यांभोजयेद्विप्रानपूपैर्घृतपाचितैः॥ अस्मा-
मेवचतुर्थ्यांतुजातापूर्वमुमासती॥१४॥ तस्यांपूजाचसंयोज्यास्त्रीभिःसौभाग्यवृद्धये॥ उपहारैश्चविविधै-
र्गीतनृत्योत्सवादिभिः॥१५॥ होमैःपयोभिर्वस्त्रैश्चपत्रपुष्पैःसुगंधिभिः॥ गांचसंपूजयेत्सष्ट्यांस्त्रीभिःसं-
तानकांक्षिभिः॥१६॥ सप्तम्यांज्येष्ठमासस्यज्येष्ठांचैवप्रपूजयेत्॥ तत्रैववासोज्येष्ठायाभविष्यतिनसंशयः
॥१७॥ अतस्तांतत्रसंपूज्यनरैर्दारिद्र्यभीरुभिः॥ दशम्यांपूजयेद्गंगांयथाविभवसंभवैः॥१८॥ अवतीर्णायतः
स्वर्गाद्दशम्यांलोकपावनी॥ ततस्त्रिभिरहोभिश्चसाध्यमेकादशीव्रतं॥१९॥ निर्जलंसमुपोष्यैवसर्वपापप्रणा-
शनं॥ एकास्त्रीसमारभ्यपौर्णिमांतंव्रतंचरेत्॥२०॥ सावित्रिरपि[illegible]तापूजयेद्वटसंन्निधौ॥ तद्व्रतंचम-
हत्पुण्यंस्त्रीणांसौभाग्यदायकं॥२१॥ त्रिदिनंवटमूलेचब्रह्माणंर[illegible]नं॥ सत्यवंतंचसावित्रीपूजयेद्वट-
संन्निधौ॥२२॥ एवंदिनत्रयंकार्यंनिद्राचाहारवर्जितं॥ एवंकृत्[illegible]कर्तव्यंपारणंप्रतिपद्दिने॥२३॥ नित्यं
स्त्रीभिःसदाकार्यंवर्षेवर्षेयथातथा॥ ज्येष्ठीज्येष्ठापुत्रावैस्यात्[illegible]कोटिपर्यशताधिका॥२४॥ तस्यांदानो ४

निदेयानिकथयामिसमासतः॥ तथायस्यांसमभवत्कूर्मकल्पस्तोधनाः॥२५॥ तत्रस्नानंचदानंचतर्पणंद्वि-
जभोजनं॥ पितॄन्नुद्दिश्यकुर्वंतितेषांतिपरमंपदं॥२६॥ यस्यां[illegible]तरारंभःपुण्यपक्षश्चैवभूसुराः॥ तत्र
श्राद्धंचदानंचपितॄणांतृप्तिदायकं॥२७॥ एवंव्रतानिबहुशोमा[illegible]सेन्द्रेवपूजिते॥ संक्षेपेणमयाचोक्त-
यथाशक्त्याद्विजोत्तमाः॥२८॥ इतिश्रीभाविष्यपुराणेज्येष्ठमाहात्म्येतृतीयोध्यायः॥३॥ ॥श्री॥ स्कंदउवा-
च॥ ज्येष्ठेमासिविशेषेणव्रतंपंचाग्निसाधनं॥ कर्तव्यंकामिभिःकामंसकामैश्चैवसिद्धये॥१॥ यस्यप्रभावा-
द्गिरिजाशैवंपदमनुव्रजेत्॥ ऋषयऊ॰॥ कथंपंचाग्निविख्यातंकथितंचव्रतंत्वया॥२॥ कार्यंकेनविधानेन
तत्सर्वंकथयस्वनः॥ स्कंदउ॰॥ पुरारुद्रेणभोविप्रादग्धःकामोसुखप्रदः॥३॥ पार्वतीदीनवदनाशुशोचबहु-
वासरं॥ पितृसद्मनिवासीपिलेभेसानसुखंक्वचित्॥४॥ ऋषीणांप्रधमाणानांहिमाचलनिवासिनां॥ प-
श्यतिस्मतदाकालेउपायंचिंतानिर्वृतेः॥५॥ ऋषीणांप्रवरस्तत्रभृगुर्वाक्यमथाब्रवीत्॥ भृगुरु॰॥ पंचाग्नि-
साधनंनामव्रतंकुरुयथाविधि॥६॥ पार्वत्यु॰॥ स्वामिन्केनप्रकारेणकर्तव्यंव्रतमुत्तमं॥ भृगुरु॰॥ साधुपृष्टं
महाभागेविस्तरात्कथयामिते॥७॥ ज्येष्ठमासितृतीयायांप्रभातेविमलेजले॥ स्नात्वानित्यक्रियांकुर्याच्छुक्लवासा
गृहंव्रजेत्॥८॥ पुण्याहवाचनंकुर्याद्ब्राह्मणान्पूजयेत्तथा॥ समित्समिद्धान्चतुरोकृत्वाग्नीन्प्रज्वालितः॥९॥

ज्येष्ठ
५

तेषां मध्ये स्थिता चापि सावितारं समीक्षयेत् ॥ यावदस्तमितो भानुस्तावत्तिष्ठेज्जितेंद्रियः ॥१०॥ एवं मासव्रतं कार्यं नि
राहारो जितेंद्रियः ॥ भृगोश्च गिरमाकर्ण्य संतुष्टा च उमा सती ॥११॥ तेनोक्तेन विधानेन चकार शिवतुष्टये ॥ पर्वद्वाद
शवर्षाणि प्रतिज्येष्ठे शुभानना ॥१२॥ व्रतस्यास्य प्रभावेन शिवो मोहमुपागतः ॥ क्व गता पार्वतीत्येति विचार्यैवं समा
धिना ॥१३॥ ज्ञात्वा तां तपोवनं तस्थापयौवनचराकृतिः ॥ सांत्वयामास विविधैर्वाक्यै रमृतसंनिभैः ॥१४॥ तया निर्भ
र्त्सितः सोथ निजरूपं प्रकाशयेत् ॥ ततः सा गिरिजा विप्रा व्रीडयाधोमुखी भवत् ॥१५॥ अंके कृत्वा तु गिरिजां आलि
लिंग्य मुदा शिवः ॥ हिमवानपि तज्ज्ञात्वा आययौ शिवसंनिधौ ॥१६॥ पूजयामास विविधै रुपचारैरनेकधा ॥ गृ
हीत्वाज्ञां हिमवतो तपोवननिवासिनां ॥१७॥ अर्धांगे गिरिजां कृत्वा मयौ कैलाससमात्मनः ॥ इति ते कथितं विप्राग्र्य
तपंचाग्निसाधनं ॥१८॥ माहात्म्यं ज्येष्ठमासस्य भूयः किं श्रोतुमिच्छथ ॥ बहुभिश्च कृतं पूर्वं व्रतं सर्वार्थसाधनं ॥१९॥
धर्मार्थकाममोक्षाणां साधनं परमं मतं ॥ सर्वसौभाग्यदं स्त्रीणां कृपौत्रप्रवर्द्धनं ॥२०॥ कुर्वंति ये व्रतमिदं ज
गदीशतुष्टपुष्ट्यै च सर्वमनसेप्सितकामजातं ॥ ते प्राप्नुवंति विविधं भवे भुक्तिकामभोगानंते व्रजंति निलयं पर
मस्य पुंसः ॥२१॥ इति श्रीभविष्यपुराणे ज्येष्ठमाहात्म्ये चतुर्थोध्यायः ॥४॥ ॥श्री॥ ऋषय ऊचुः ॥ ज्येष्ठे मासि
विशेषेण स्त्रीभिः सौभाग्यकांक्षिभिः ॥ किं कर्तव्यं व्रतं स्नानं कृपया च प्रसादतः ॥१॥ स्कंद उवाच ॥ पुरा कैलास ५

सिखरे सुखासीनं महेश्वरं ॥ प्रणम्य पार्वती देवं बद्धांजलि रभाषत ॥२॥ पार्वत्युवाच ॥ शिवशंभो जगन्नाथ सर्वज्ञ
सुखदायक ॥ ऐश्वर्यं सुखभाग्यं च नास्ति मत्सदृशी क्वचित् ॥ एतद्संस्मृतां याति येनोपायेन रां कर ॥ तद्व्रतस्वरूपा
दिष्टं ध्येयादि मे स्यादनुग्रहः ॥४॥ शिव उ० ॥ एवं नास्ति महेंद्रस्य स्वर्लोके प्रजापतेः ॥ सर्वेषां दृष्टपजातीनां नाशमस्ति
वरानने ॥५॥ तथापि कथयिष्यामि तव भक्त्यावशीकृतः ॥ भद्रे कृतं स्वयत्नेन रंभा स्वंव्रतमुत्तमं ॥६॥ ज्येष्ठमा
सितृतीयायां स्नाता सा नियममप्सरा ॥ पार्वत्युवाच ॥ केयं रंभा कथं तस्या व्रतं कार्यं समाहितैः ॥७॥ शिव उ० ॥ सावित्री
ब्रह्मणा शापाज्जडरूपत्वमास्थिता ॥ सेयं रंभा च कदली कर्परजननी शिवा ॥८॥ स्वासप्ता तु सावित्री पितृवेश्म
नि संस्थिता ॥ पित्रोपदिष्टमार्गेण ज्येष्ठे स्नानार्चनादिकं ॥९॥ चकार पंचवर्षाणि ततः प्रीतो पितामहः ॥ आविर्ब
भूव तस्याग्रे ज्येष्ठेमात्तिथौ शुभे ॥१०॥ वरान् ददौ बहुतरान् भूषणं च बहुदुर्लभान् ॥ रंभाभवत्तमंशेन क्लो
कानुग्रहहेतवे ॥११॥ नार्चयंति शुचौ मासि मद्युक्तां चांशुचिस्मिते ॥ तासां च क्षीणतां याति सौभाग्यं सुखसं
पदः ॥१२॥ सावित्र्या सह ब्रह्माथ सत्यलोकं जगाम ह ॥ एतत्ते कथितं भद्रे सावित्रीशापकारणं ॥१३॥ रंभाव्रत
विधानं च कृपयापि समासतः ॥ उद्याने वा गृहे वाथ रम्यला च कदलीवनं ॥१४॥ वापयेच्च शुचौ मासि तृतीया
यां द्विजोत्तमाः ॥ पंचामृतैश्च विविधैर्गंधतोयैः सकर्पुरैः ॥१५॥ पुष्पोदकैः शीतलैश्च तथा चोशीरमिश्रि

ज्येष्ठ
६

ते:॥ आलवाला निपूर्णे निकारयेच्च हरिने दिने॥१६॥ एवं रम्यं वनं कृत्वा ब्रह्माणं नाभिसंस्थितं॥ सुवर्णनिर्मितं कृ
त्वा पूजयेत्कलशोस्थितं॥ ब्राह्मणान्भोजयेत्तत्र पायसं हविष्यं स्वयमेव हि॥१८॥ गीतवादित्रनिर्घोषैः पुराणश्र
वणादिभिः॥ जागरं तत्र कर्तव्यं कथाश्रवणकीर्तनैः॥१९॥ एवं प्रातिदिनं कार्यं कदलीवनसंस्थितः॥ एवं मास
व्रतं कुर्यात्सर्वकामार्थिभिर्नरैः॥२०॥ पूर्णे मासे तु तत्सर्वमाचार्याय निवेदयेत्॥ वस्त्रालंकरणैः पूज्य गां च द
द्यात्पयस्विनीं॥२१॥ होमं कुर्याद्यथाशास्त्रं विप्रेभ्यो भूरिदक्षिणं॥ स्वशक्त्या भोजयेद्विप्रान्पायसैः शर्क
रान्वितैः॥२२॥ द्विस्य पारणं कुर्याद्बंधुजनसमन्वितः॥ एतत्ते कथितं सर्वं रहस्यं गोपितं पुरा॥२३॥ भद्रे
कृष्णयत्नेन फलं प्राप्नोषि शाश्वतं॥ एतद्व्रतं किल पुरा जगदीश्वरेण सुगोपितं दिनकरास्रजनिग्रहेण॥
तेऽद्य मुनाप्रगटितं गिरिराजपुत्र्या भावेन विश्वगुरुणा खिलकर्णे कृहे तवे॥२४॥ इति श्री भविष्यपुराणे ज्येष्ठ
माहात्म्ये पंचमोऽध्यायः॥५॥ ॥ श्री॥ पार्वत्युवाच॥ कथं चीर्णं कृमिदं फलं प्राप्तं यथातथं॥ तत्सर्वं सेति
हासेन कथयस्व मम प्रभो॥१॥ शिव उ०॥ त्रेतायुगे कश्चिदुर्वी धुविभवो मनामतः॥ द्विजो द्विजकुलश्रेष्ठो ध
नैश्च बहुबांधवः॥२॥ अनपत्यस्तु दुःखार्तो सीदती सयशीस्थतः॥ व्रतदानान्यनेकानि चकार विधि
पूर्वकं॥३॥ अथ कालेन बहुना जाता कन्यातिशोभना॥ दिने दिने प्रवर्धे कन्या कमललोचना॥४॥ तां

६

विवाहोचितां दृष्ट्वा भार्यां स्वां च द्युमंत्रयत॥ कस्मै देया सुरूपाय सुरूपा मोदते वरं॥५॥ निर्गतः स्वगृहात्तूर्णं व
रान्वेषणतत्परः॥ ग्रामाद्ग्रामांतरं गत्वा नगराण्यपि॥ मं... तीर्थानि च क्षेत्राणि विविधानि च॥
दृ॥ नापश्यत्कन्यकारूपसदृशं वरमुत्तमं॥ शिवशर्मेति विख्यातो ...ष्या सहितं तत्र॥७॥ तपोवनानि रम्या
णि ऋषीणां भावितात्मनां॥ अथापश्यत्कौशिकस्य आश्रमं द्विजपुंगवः॥८॥ शिवशर्मेति विख्यातो रूपला
वण्यसंयुतः॥ अपरं नाम तस्यास्ति रूपराशीति विश्रुतः॥ नास्ति तस्य सदृशं रूपं समस्ते भुवि मंडले॥९॥ अतो
ऋषिभिः कृतं तं रूपराशीत्येव हि॥ धृतं टिः स्वाशयं सर्वैन्ययेयस्य ततानृषीन्॥१०॥ तैरनुमोदितः सोपि शिव
शर्मणि संयुतः॥ जगाम नगरं स्वीयं हर्षेणोत्फुल्लमानसः॥११॥ सर्वैर्बंधुजनैः सार्द्धं विवाहमकरोद्द्विजः॥ नाति
दूराद्गृहं दत्तं धनानि विविधानि च॥१२॥ पारिबर्हं बहुविधं विप्रेभ्यो भूरिदक्षिणां॥ शिवशर्मा तया सार्द्धं गुणव
त्या सुशीलया॥१३॥ अथ स बुभुजे भोगान् प्रपंचजनितं सुखं॥ अथ कालेन बहुना स द्विजः कालचोदितः॥१४॥
समिधार्थं वनं यातो संध्याकाले वृक्षमाश्रयन्॥ पीडा तु शिशिरं तीव्रं यंस्तु घोरे तरोर्धः॥१५॥ एतस्मिन्नंतरे
तत्र निशायां जागरेण सः॥ भ्रमंतं तद्वने विप्रो तत्र व्याघ्रेण भक्षितः॥१६॥ एतं न कोपि बुबुधे अस्तं याते दि
वाकरे॥ श्वसुरश्वशुरस्तस्य स्त्री सेवकैः सहितं वनं॥१७॥ अन्वेषयामास निशि दीपिकाभिः समंततः॥ एवं

ज्ये.ष्ठ.

मन्वेषमाणेषु भास्करस्योदयो भवत्॥१८॥ ततस्ते दुःखिता नूनं निराशा गृहमागताः॥ ततो गुणवती साध्वी
पितुर्गेहे निवासिनी॥१९॥ देवार्चनरता नित्यं शोकाकुलितमानसा॥ कदाचिद्दैवयोगेन नारदः समुपाग
तः॥२०॥ विधिवत्पूजयामास प्रणम्य च मुहुर्मुहुः॥ नारद उ०॥ नारदस्तु प्रसन्नात्मा उपदेशं चकार ह॥२१॥
भद्रे कुरुष्व शुचौ मासे व्रतं रंभाभिधं शुभं॥ पूजयस्व विधानेन देवं भर्तृस्वरूपिणं॥२२॥ यावज्जीवं कुरु व्र
तं अनन्यमनसानघे॥ विष्णुं भर्तारमासाद्य स्यान्नं प्राप्स्यसि शाश्वतं॥२३॥ दुहितैवां तदैवेयं ब्रह्मनंदनो
द्विजवल्लभा॥ वापयामास कदलीवने वनविहारिणी॥२४॥ चकार सकलं धर्मं नारदेन यथोदितं॥ गते बहु
तिथौ काले तस्याः प्रापिता भर्तृ॥२५॥ तद्दिने निधनं प्राप्ता विमानस्था दिवं गता॥ तत्पुण्यतेन्वया ज्ञाता
तुलसी विष्णुवल्लभा॥२६॥ नान्यत्किंचित्प्रियं विष्णोस्तुलसीं च विनानघा॥ गिरिजापि चकारैवं आज्ञया
गिरिजापतेः॥२७॥ एतद्व्रतप्रभावेन गिरिजा शिववल्लभा॥ श्रुत्वा [illegible]ज्ञानन मुख्या महिमानमुत्तं ब्रह्मसर्व
यः प्रमुदिताः कुसुमावतंसैः॥२८॥ पूजां च चक्रुर्मुनयो भवानीं विभर्त्सकं दमरविंद निर्भंवदास्यं॥२९॥ इ
ति श्रीभविष्यपुराणे ज्येष्ठमाहात्म्ये षष्ठोऽध्यायः॥६॥ ॥श्रीऋषय उ०॥ भूयः कथयते भद्रं माहा
त्म्यं मास संभवं॥ यस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते॥१॥ स्कंद उ०॥ उपोष्य सकलं मासं प्रातःस्ना

६

यी जितेंद्रियः॥ कंदमूलफलाहारो भूमिशायी विमत्सरः॥२॥ शौचाचाररतो नित्यं सत्यवाक् प्रियदर्शनः॥
प्रतिपद्दिनमारभ्य यावत्कृष्णत्रयोदशी॥३॥ अंतर्हितो व्रतं [illegible]दंभोहाविवर्जितः॥ त्रयोदश्यां समुपा
य मंगलस्नानमाचरेत्॥४॥ पुण्याहवाचनं कार्यं मधिवासस्य[illegible]तो॥ सौवर्णं रजतं ताम्रं मृण्मयं वा
नवं घटं॥५॥ स्थापयेत्कलशांदिव्यं पंचरत्नपरिप्लुतं॥ तस्योपरि न्यसेद्देवं शंखचक्रगदाधरं॥६॥ निर्णीय
तत्र कुंभे च लक्ष्मीगरुडसंयुतं॥ ब्रह्मादिदेवतां स्थाप्य स्वगृहे च द्विजर्षभाः॥७॥ पुष्पमंडपिका कार्या चतु
र्द्वारोपशोभिता॥ कदलीस्तंभसंयुक्ता तोरणैर्विविधैस्तथा॥८॥ तन्मध्ये पूजयेद्देवमुपचारैरनेकशः॥
पक्वान्नैः पायसैः खंडैरोदनैर्दधिसंयुतैः॥९॥ ऋतुकालोद्भवैः पुष्पैर्नारिकेलादिभिः फलैः॥ धूपैर्दीपैश्च
तांबूलैर्नैवेद्यैः सोगंधिकैस्तथा॥१०॥ रात्रौ जागरणं कुर्यान्नृत्यगीतादिभिर्व्रती॥ कीर्तनं कारयेत्तत्र हरिभ
क्तैर्विशारदैः॥११॥ गीतवादित्रनिर्घोषैर्नीयमानां महानिशां॥ ततः प्रभाते विमले नद्यादौ स्नानमाचरेत्॥१२॥
कृत्वा नित्यविधिं सर्वं ब्राह्मणैरनुमोदितः॥ वरयेद्द्विजान्पंच पूजयेद्वस्त्रभूषणैः॥१३॥ होमं कुर्यात्सुयत्नेन
कुंडे वा स्थंडिलेपि वा॥ पौरुषेणाथ सूक्तेन हुनेद्विष्णु कल्शोत्तरं॥१४॥ शार्करा खंड संहितं ससर्पि तिलपाय
सं॥ विष्णोर्नुकं इति मंत्रेण तथैवाष्टोत्तरं शतं॥१५॥ पूर्णाहुतिं ततो हुत्वा होमशेषं समापयेत्॥ ऋत्विग्भ्यो

ज्येष्ठ
८

दक्षिणां दद्यात् गावश्च बहुदुग्धदाः ॥१६॥ छत्रोपानहदानानि दशदानानि दापयेत् ॥ स्वशक्त्या भोजयेद्द्वि-
प्रान् दक्षिणाभिः सुतोषितान् ॥१७॥ तामर्चां गुरवे दद्याद्वस्त्रयुग्मेन वेष्टितान् ॥ केशवः प्रतिगृह्णातु के-
शवो वै ददाति च ॥१८॥ केशवस्तारको भाभ्यां केशवाय नमो नमः ॥ इमं मंत्रं समुच्चार्य दक्षिणासहितां हरेः ॥
१९॥ प्रतिमां विप्रवर्याय श्रोत्रियाय कुटुंबिने ॥ ततस्तु पारणं कार्यं बंधुभिः सहितं द्विजाः ॥२०॥ व्रतं कुर्व-
ति ये लोके दुर्लभं जगतीतले ॥ उद्यापनं ततः कुर्याद्व्रतस्य फलसिद्धये ॥२१॥ निमंत्र्य ब्रा[illegible]णान् पूर्वं सपत्नी-
कान् त्रयोदश ॥ वस्त्रालंकरणैः पूज्य दत्त्वा गावस्त्रयोदश ॥२२॥ सुभूषिताः सवत्साश्च गहूला बहुदुग्ध-
दाः ॥ दक्षिणा च यथाशक्ति रन्येभ्यो भूरिदक्षिणा ॥२३॥ होमादिकं तु पूर्वोक्तं कार्यं वित्तानुसारतः ॥ वित्त-
शाठ्यं न कर्तव्यं परे विष्णुव्रते नघाः ॥२४॥ शक्त्या यत्क्रियते किंचित्तत्सर्वं सफलं भवेत् ॥ विफलं तद्द्विजानी-
याद्वंचकस्य षठस्य च ॥२५॥ तस्मात्सर्वप्रयत्नेन स्वशक्त्या प[illegible]दृशी ॥२६॥ इति श्रीभविष्यपुराणे ज्येष्ठ-
माहात्म्ये सप्तमोऽध्यायः ॥७॥ ॥श्रीः॥ स्कंद उवाच ॥ पुरा हिव[illegible]म भूधरो भूधराधिपः ॥ स्थावरं जंग-
मं रूपं बिभर्ति स्वेच्छया सदा ॥१॥ तस्य भार्या सुचार्वंगी मेनि[illegible]मेना नामतः ॥ सर्वसिद्धिसमायुक्तो अन-
पत्यः सुदुःखितः ॥२॥ चकार व्रतदानानि संततिं न लभेच्चिरं ॥ ततो मेनां समाहूय धिगिति प्रलपन्मुहुः ॥३॥ ८

रूपलावण्यसंपन्ना या नारी सुतवर्जिता ॥ सा नारी सर्वलोकेषु निंदिता दुर्भगेति च ॥४॥ तां दृष्ट्वा बहुसंतापो
जायते सुचिरं मम ॥ अद्यप्रभृति नेवास्म दर्शनीयं शुचिस्मिते ॥[illegible]॥ कथं बिभर्षि वै प्राणान् पश्यखिविनि-
श्चिते ॥ इति भर्तृवचः श्रुत्वा वृक्षो वातहतो यथा ॥६॥ निपपात म[illegible]व ज्याह तद्वाचलः ॥ सा मेना क्रंदमा-
ना च हाहेति प्रलपन्मुहुः ॥७॥ अदृष्टपूर्वं मनुजैर्याता सा गिरि[illegible]दरं ॥ सिंहव्याघ्रगणाकीर्णं झिल्लीनाद-
गणावृतं ॥८॥ तत्र गत्वा स्थितवती स्थाणुवत्संयता सती ॥ न चाहारं न निद्रां च न चान्यत्कर्म कुर्वती ॥९॥
स्मरंती मनसा मायां विष्णोर्गुणमयीं सदा ॥ दैवयोगेन तत्सर्वं जातं स्वेष्टं सुदुष्करं ॥१०॥ तस्य पुण्यप्रभा-
वेन आविर्भूता जगन्मायि ॥ तुष्टानपरया भक्त्या वरं याचेति साब्रवीत् ॥११॥ तव मासोपवासेन व्रतेन परि-
तोषिता ॥ अदेयमपि दास्यामि त्वया भक्त्या वशीकृता ॥१२॥ इति तद्वचनं श्रुत्वा मुदोवाच सहर्षचः ॥ मेनका
उवाच ॥ यदि तुष्टासि देवेशि कृपा भव ममांगजा ॥१३॥ भवामीति वरं दत्ता पुत्रैकस्ते भविष्यति ॥ अन्यदेवं
हितं वांछितं तत्कुरुष्व ममाज्ञया ॥१४॥ अनायासेन ते लब्धं माहात्म्यं पुण्यसंभवं ॥ व्रतं कुरु प्रयत्नेन गच्छ स्व-
निजमंदिरं ॥१५॥ विधानं सकलं तस्यै मायया च निवेदितं ॥ अंतर्हिता ततो माया मेनापि स्वगृहं ययौ ॥१६॥
हिमाचलाय तत्सर्वं भृगुणा कथितं पुरा ॥ भर्तृपादिष्टमार्गेण मेनिकापि चकार तत् ॥१७॥ हिमवानपि तज्ज्ञा

ज्येष्ठ
१

त्वासंतुतोषजहर्षच ॥ मेनामालिंग्यपाणिभ्यामंके कृत्वातुसांत्वयन् ॥१८॥ अथस्वल्पेनकालेनसमहामे
निकाभवत् ॥ वसिष्ठोपिसमागत्यतस्याःपुंसवनंत्क्रिया ॥१९॥ चकारहिमहाभाग्यसदृशाभुविदुर्लभा ॥ आ
विर्बभूवतस्याग्रेजगद्धात्रीनिजेछया ॥२०॥ उमागौरीपार्वतीचनाम्नाविख्यातिमागता ॥ एवंज्येष्ठेचशु
क्लायांचतुर्थ्यांजनिताशिवा ॥२१॥ तस्मात्सातत्रसंपूज्यास्त्रीभिःसौभाग्यवर्द्धये ॥ मृण्मयंगिरिजांकृत्वाच
तुर्द्धारोपशोभितं ॥२२॥ धान्यप्ररोहणंकार्यंसमंतात्क्रिरिजासनात् ॥ मध्येचांदोलनंकार्यंस्फाराजयारजना
दिना ॥२३॥ उमांस्वर्णमयींकुर्यात्संस्थाप्यांदोलनेशुभे ॥ प्रपूज्यविधिवद्भक्त्यायथाविभवसंभवैः ॥२४॥
पूजयेच्चसुवासिन्योभोजयेच्चकुमारिकाः ॥ नानासौभाग्यद्रव्यैश्चमाल्यैश्चंदनकंचुकैः ॥२५॥ गीतवा
दित्रनिर्घोषैर्मासमेवंसमापयेत् ॥ निसंहविष्यमश्नीयात्कुर्याश्चैवप्रयत्नतः ॥२६॥ उद्यापनंततःकुर्या
त्फलसंप्राप्तिहेतवे ॥ गौरीमिमेतिमंत्रेणपयोभिर्होममाचरेत् ॥२७॥ निर्वर्त्यसकलंकर्मगांचदद्यात्पय
स्विनीं ॥ गौरीव्रतमितिख्यातंस्त्रीणांसौभाग्यदायकं ॥२८॥ [illegible]कुरुतेनारीचतुर्थ्यांभोजनंयदि ॥
दुर्भगत्वमवाप्नोतिसानारीजन्मजन्मनि ॥२९॥ उमाजयंतिविख्याततदादिजगतीतले ॥ पुनश्चकारसा
मेनापुत्रसंतानहेतवे ॥३०॥ तेनव्रतप्रभावेनजातःपुत्रोमहौजसा ॥ मैनाकइतिविख्यातोहिमाचलइवाप १

रः ॥३१॥ इतिश्रीभविष्यपुराणेज्येष्ठमाहात्म्येअष्टमोध्यायः ॥८[illegible] ॥ श्री ॥ स्कंद उ० ॥ अत्रैववर्णयिष्यामिक
थांपापहरांशुभां ॥ यस्याःश्रवणमात्रेणसंशयोनोगमिष्यति ॥१॥ [illegible]ध्यस्योत्तरदिग्भागेकांतिपूर्यांद्विजो
त्तमः ॥ नाम्नामेधाविविख्यातोदेवतातिथिपूजकः ॥२॥ भार्याचं[illegible]नामागौतमस्यकुलोद्भवा ॥ पतिव्रत
परानारीपतिशुश्रूषणेरता ॥३॥ गृहकर्मसुसंसक्तासर्वदाप्रि[illegible]षिणी ॥ कृषिकर्मकरोनित्यंवार्धूषिवृ
त्तिमाश्रयत् ॥४॥ गतेबहुविधेकालेअनपत्यःसुदुःखितः ॥ चिंतयापरयाविष्टोनकिंचिदपिरोचते ॥५॥ चिं
तामग्नस्यतस्याथराजयक्ष्माबभूवह ॥ उपायान्विविधान्कृत्वामणिमंत्रौषधादिकान् ॥६॥ अपतत्स्वग
लत्कुष्ठरोगःपरमदारुणः ॥ प्राप्तोनिराशतांयातोतत्रमास्तद्विजोत्तमः ॥७॥ दृष्ट्वातथाविधंकांतंउदासी
नाबभूवह ॥ निर्गतोस्वगृहात्तूर्णंगंगातीरमवापतु ॥८॥ तत्रकुटीनिर्मिताचवासितुंस्वबलेनच ॥ पतिना
सहितासत्रनिनायबहुवासरं ॥९॥ आगतोज्येष्ठमासस्तुसर्वपापप्रणाशनः ॥ तस्यानुष्ठानमात्रेणनारदः
स्वेच्छयागतः ॥१०॥ प्रणम्यविधिवत्तस्यपूजांकृत्वायथाविधि ॥ निवेद्यसकलंतस्यरोगंमोहस्यकारणं ॥११॥
पारदौविप्रसर्वामाहितंवचनमब्रवीत् ॥ पुराजन्मनिबालेयंब्राह्मणोज्ञानदुर्लभः ॥१२॥ माहात्म्यंज्ये
ष्ठमासस्यअवमत्यमदोद्धतः ॥ गदयांस्तेनपापेनजातोयंनासंशयः ॥१३॥ तद्दोषपरिहारार्थंशुचि

मासे व्रतं कुरु ॥ गौरिनाम्ना तु विख्यातं सुखसौभाग्यदायकं ॥१४॥ तथेत्युक्त्वा विशालाक्षी पूजयामा
स तं मुनिं ॥ मुनौ याते च सुश्रोणि चकार पतिनासह ॥१५॥ नारदादिष्टमार्गेण भक्तियुक्तेन चेतसा
॥ तस्यानुष्ठानमात्रेण क्षीणो भर्त्तुश्च प्रणे तमः ॥१६॥ शनैः शनैरभू[illegible]तस्मुक्तो तस्माद्रोगाद्विजो
त्तमः ॥ पुण्याहनं चकारोच्चैः पूजनं द्विजतर्पणं ॥१७॥ ददौ धनानि विप्रेभ्यो गोधनानि बहून्यपि ॥
पूजयन्स बहुशो विप्रान् पक्वान्नैः पायसैरपि ॥१८॥ स्वयं च पारणं चक्रे पत्न्या च सहबांधवैः ॥ ततः
स्वगृहमायातो बंधुभिः परिवारितः ॥१९॥ महोत्सवः कृतः सर्वैस्तत्र तत्र सुखासिभिः ॥ वृत्तांतः कथि
तस्तेषां पृच्छतां पुरवासिनां ॥२०॥ विस्मितास्तदा सर्वे माहात्म्यश्रवणादलं ॥ अल्पास्मिन्न हायने तौ तु
पुत्रार्थं च प्रचक्रतुः ॥२१॥ तस्य प्रभावात्संजातः पुत्रो रामस्वापरः ॥ जातकर्म च कारायु ददौ गावः सह
स्रशः ॥२२॥ धनवस्त्राण्यलंकारान् विप्रेभ्योऽप्यधिकं ददौ ॥ [illegible]मासव्रतं चक्रुस्ते तत्रत्याः पुरवासिनः ॥
२३॥ सर्वेऽपि सुखसंपन्ना आधिव्याधिविवर्जिताः ॥ तदादि विभतं ख्यातिं प्राप लोके महद्व्रतं ॥२४॥
शिवायै कथितं पूर्वं शिवेन प्रभविष्णुना ॥ संक्षेपेण मया ख्यातं रहस्यं परमं शुभं ॥२५॥ स्कंदस्य
वचनं श्रुता ऋषयः प्रीतमानसाः ॥ चक्रुस्ते पुष्पवृष्टिं वै जय जीवेति चाब्रुवन् ॥२६॥ इत्येवं कार्ति

केयेन चोक्तं पृथक्पृथक् ॥ पुनरूचुस्तपोनिष्ठा मिप[illegible]ति हर्षपूरिताः ॥२७॥ अहो ऽद्भुतानि मासा
नां माहात्म्यानि बहून्यपि ॥ ज्येष्ठस्य वासरस्यैकस्याप्या[illegible]न तुलीं व्रजेत ॥२८॥ विचिंत्यैवं ततः श्रेष्ठाः
ज्येष्ठे स्नानार्चनाक्रियां ॥ चक्रुः सर्वे प्रयत्नेन यथाविभवसंभ[illegible]ः ॥ इति श्रीभविष्यपुराणे ज्येष्ठमाहा
त्म्येन वमोऽध्यायः ॥९॥ ॥श्री॥ स्कंद उवाच ॥ मासेऽस्मिन्विहि[illegible]ख्यये कार्यं दशहराव्रतं ॥ स्नानं भागी
रथीतोये कार्यं प्रतिपदादिषु ॥१॥ ऋषय उ॥ कथं दशहरानाम स्नानं प्रतिदिने कृतं ॥ कस्माज्ज्येष्ठे
च कर्तव्यं तत्सर्वं विस्तराद्वद ॥२॥ स्कंद उवाच ॥ ज्येष्ठमासि सिते पक्षे दशम्यां बुधहस्तयोः ॥ गरानंदे
व्यतीपाते कन्याचंद्रे वृषे गुरौ ॥३॥ दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ भुक्त्वा च विविधान्भो
गानंते हरिपुरं व्रजेत् ॥४॥ अदत्तानामुपादानं हिंसा चैवाविधानतः ॥ परदारोपसेवा च कायिकं त्रिवि
धं स्मृतं ॥५॥ पारुष्यं सततं चैव पैशूनं चापि सर्वशः ॥ असंबद्धप्रलापश्च वाचिकं स्याच्चतुर्विधं ॥६॥ पर
द्रव्येष्वभिध्यानं मनसाऽनिष्टचिंतनं ॥ वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतं ॥७॥ एतानि दश पा
पानि हरन्ते दर्शनादसौ ॥ तस्माद्दशहरा प्रोक्ता मुनिभिः पूर्वदर्शिभिः ॥८॥ दशजन्मार्जितैः पापैर्मुक्तः सह
स्रा समैरपि ॥ हरति स्नानमात्रेण तस्माद्दशहरा स्मृता ॥९॥ गंगां प्रपूज्य यत्नेन मंत्रैरेतैः पुरातनैः ॥

ज्येष्ठ॰
११

नमः शिवायै शांतायै नारायण्यै नमो नमः ॥१०॥ दशपापहरायै च गंगायै ते नमो नमः ॥ तत्रैव प्रयजेद्देवान्
ब्राह्मणांश्च महौजसः ॥११॥ नारायणं महेशं च ब्रह्माणं भास्करं तथा ॥ भगीरथं हिमवंतं स्कंदं च गण
नायकं ॥१२॥ तथा चंडीं च सोमं च पूजयेत्सा समाहितः ॥ फलैश्च दशसंख्याकैर्दीपं दद्यात्पृथक्पृथक् ॥१३॥
दशदीपान्प्रदद्यात्तिलांश्च दशप्रस्तरान् ॥ गंगायै सर्वरूपिण्यै मंत्रेणानेन चार्चयेत् ॥१४॥ तथैव दश
संख्याकान्सक्तुपिंडान्जले क्षिपेत् ॥ पुंडरीकान्ततो लिख्याद्दशसंख्यांश्च शास्त्रितः ॥१५॥ मत्स्यकच्छप
मकरीशुशुमारादिकांस्तथा ॥ हंसान्स्वर्णमयान्दश तथा राजतताम्रादिभिस्तथा ॥१६॥ द्वावपिच्छ यौ
कृत्वा समभ्यर्च्य जले क्षिपेत् ॥ ततो दशप्रस्थमितान्तिलांश्चाहिषयांस्तथा ॥१७॥ गावश्च दशसंख्याकान्
ब्राह्मणेभ्यो यथाविधि ॥ एवं कृत्वा विधानेन वित्तशाठ्यविवर्जितः ॥१८॥ तथैव भोजयेद्विप्रान्पक्वान्नैः
पायसैरपि ॥ दशजन्मार्जितैः पापैर्मुच्यते नात्र संशयः ॥१९॥ ज्येष्ठे मासि सिते पक्षे प्राप्ता प्रतिपदा ति
थिः ॥ दशलिंगपूजनेन दशपापहरा तिथिः ॥२०॥ दशजन्माविभवैः पापैर्मुच्यते नात्र संशयः ॥ दशयोगा
इति ख्याता कदाचिद्दैवयोगतः ॥२१॥ लभते मानवास्तत्रापि ष्टेप्यैके महत्तरः ॥ केवले पितया ज्येष्ठे
सर्वयोगविवर्जिते ॥२२॥ सकलं चाद्विजानीहि फलं पूर्णमनोरथं ॥ यथा उडुगणैः सार्द्धं शुशुभे सनि २१

शाकरः ॥२३॥ तथैव योगसंपन्नो ज्येष्ठो भाति हतस्ततः ॥ यदि शुक्लं विना योगा विफलाः स्युर्न संशयः ॥
२४॥ इति श्रीभविष्यपुराणे ज्येष्ठमाहात्म्ये दशमोध्यायः ॥१०॥ [illegible] ॥ छ ॥ ऋषय ऊचुः ॥ सर्वयोगाः समा
ख्याताः पुण्यदाः पापहारिणः ॥ श्रेष्ठस्तेषां कथं ज्येष्ठो कृष्णपक्षविधायकः [illegible] स्कंद उ० ॥ ज्येष्ठे मासि सिते पक्षे दशमी
हस्तसंयुता ॥ तस्यां स्वर्गादवतीर्णेयं जान्हवी लोकविश्रुता ॥२॥ ऋ० रथस्य तपसा गुरुराज्ञश्च पीतये ॥ आसी
त्कलियुगे घोरे जनानां पापनाशिनी ॥३॥ अतः सर्वेषु मोक्ष्ये ह्यो गंगायोगाः सहस्रशः ॥ ऋषय ऊ० ॥ क
स्माद्भगीरथो राजा चकार तप उत्तमं ॥४॥ आनीता जान्हवी कस्मात्पुत्रीभूता स्थिता सति ॥ स्कंद उ० ॥ विष्णो
र्नाभिसरोरुहात्कमलभूर्जातो प्रजानिर्मितुं ब्रह्मांडं सकलं कमंडलुधरो वेदांस्तथा चापरान् ॥ देवादीन्भुव
नत्रयान्विकल्पान्वर्त्तुं तथा पावनान् ॥ अस्रं बुते दैवा विश्वजननी गंगा सरा पावनी ॥५॥ कमंडलुसमु
द्भूता ब्रह्मणः सहसा परा ॥ न ज्ञेयो ह्यादिता तेन सम्बहुलं यदा ॥६॥ कदाचित्समये दैत्ये प्लावितं भुवन
त्रयं ॥ तदासौ शिभिर्देवैः पूजितो मधुसूदनः ॥७॥ कमंडलुस्थितैस्तोयैः स्नापयामास ते हरिं ॥ तत
स्तच्चरणांभोजान्निःसृता वेधरूपिणी ॥ नासाधृता शंभुना तूर्णं तथा चंद्रशिखामरः ॥ कृत्वा जटानां सु
दृढमालवालं तपोधनाः ॥९॥ द्विरूपता समभवद्गंगायाः शिवयोगतः ॥ ततः सदैव तां दृष्ट्वा प्रार्थितो वृषभ

धर्जः ॥१०॥ मुक्तवांश्चजटाभारान्कैवल्याबोधरूपिणी ॥ सास्वर्धुनीसमाख्यातास्वर्गगास्वर्गगामिनी ११
ततोभगीरथोराजा तपस्तप्त्वासुदारुणं ॥ आनयामासभूलोके पितॄणांमुक्तिहेतवे ॥१२॥ ततःशेषादि
भिःस्नातासानीतापातातालगह्वरं ॥ भगीरथेनसानीता स्वतोभागीरथीस्मृता ॥१३॥ ततःपीताजन्हुराज्ञा
मुक्ताश्रोतानुदाक्षिण्यतः ॥ ततःसाजान्हवीजाताविख्याताजगतीतले ॥१४॥ यतास्त्रिलोकेप्रहतिपातुंलो
कत्रयान्स्वया ॥ अतस्त्रिपथगानाम प्रभूतंजगतीतले ॥१५॥ कमंडलुसमुद्भूता विष्णुपादसमुद्भवा ॥ गं
गाहरजटोद्भूतास्वर्धुनीलोकपावनी ॥१६॥ भागीरथीजान्हवीति त्रिश्रोताभीष्मसूरपि ॥ मंदाकिनीभो
गवती तथत्रैलोक्यवासिनी ॥१७॥ एवंनामानिविहुरगेशतानिचसहस्रशः ॥ तत्राप्येतानिमुख्यानिगदि
तानित्रयोदश ॥१८॥ त्रयोदशानिनामानि येपठंतिदिवानिशं ॥ तेषांभागीरथीतीरे वासएवनसंशयः ॥
१९॥ स्नानकालेपठेन्नित्यं गंगास्नानफलंभवेत् ॥ एभिर्नामपदै[illegible]र्यंनमस्कारंप्रकुर्वते ॥२०॥ तेसर्वपाप
निर्मुक्तायांतेशिवपुरंव्रजेत् ॥ प्रयाणकालेमनसावलेननामैविभर्वाभिःप्रजपंतिमानवाः ॥२१॥ तेस्वर्ग
लोकंसमन्तासर्यांतिपरंप्रधानंपदमीश्वरस्य ॥२२॥ येनिर्देशोनामपरैर्जलानिस्पृशंतीमज्जंति

तपावसाने ॥ तेनारकीनैवगतीस्पृशंतिपरंपदंयांतिशिवप्रसादात् ॥२२॥ अहोमहात्म्यंगंगायावक्तुंईशो
कृपनेप्वलैः ॥ उक्तंचैवयथाशक्त्यामयाख्यातंद्विजांबरे ॥२३॥ इति[illegible]भविष्यपुराणेज्येष्ठमाहात्म्येएकादशो
ध्यायः ॥११॥ ॥श्रीः॥ स्कंदउ० ॥ अधुनाकथयिष्यामिगंगा[illegible]कथानकं ॥ राज्ञाभगीरथेनापिआ
नीतायस्यहेतवे ॥१॥ शृणुध्वंतत्समग्रंवोल्लसाचेतःसुनिश्चलं ॥ पुरारविकुलोत्पन्नोराजापरमधार्मि
कः ॥२॥ सगरेतिचविख्यातोसुरासुरनिबर्हणः ॥ अयोध्यांवसतिंकृत्वासतद्वीपपतिर्महान् ॥ नीति
ज्ञोनीतिकुशलोशास्तासेंद्रपुरीमिव ॥ पुत्रानिवप्रजाःसर्वापालयन्सकलंजगत् ॥४॥ शतपुत्रैश्चसंयु
क्तोसमभूत्सोपिनराधिपः ॥ सागराइतिविख्यातासर्वेसमपराक्रमाः ॥५॥ बलेनमहतातुल्याबुध्यावाचस्प
तेःसमाः ॥ शरासनेपिनिष्णातातेजसाभास्करोपमा ॥६॥ सर्वविद्यासुकुशलास्तथाधर्मपरायणाः ॥ तै
रन्वितेन्नृपवरोआरेभेसत्रमुत्तमं ॥७॥ अश्वमेधेतिविख्यातंवसिष्ठेनसहायवान् ॥ संकल्प्यंविधिवल्ल
लाउत्ससर्जचवाजिनं ॥८॥ अनर्गलंचभूषाभिर्बहुभिःपरिशोभितं ॥ अन्यैःसेनाचरैर्वीरैःस्वपुत्रैःपरि
वारितं ॥९॥ देशाद्देशांतरंगत्वाभ्रममाणोनिजेच्छया ॥ येयैराजभिर्विख्यातेधृतोसौवाजिनांवरः ॥१०॥
तान्नृतानाराजेसास्यवीर्येणमोचिताःशरणागताः ॥ एवंसर्वेपिराजानोवसुधातलपासिनः ॥११॥ करभा

ज्ये॰
१२

रभरैः क्रांता रासभोष्ट्राश्च वाजिनः ॥ राजा च सकलं द्रव्य मयोध्यायां समाश्रयत् ॥१२॥ समाप्य वाजिमेधं
च क्रतुभ्यो दक्षिणां ददौ ॥ आनीय दत्ता दिग्भ्यश्च द्रव्यजातं सुपुष्कलं ॥१३॥ ततः सर्वे विप्रमुख्येभ्यो द
दौ कामविवर्जितः ॥ एवं कृते वाजिमेधे शतैकोनेन राधिपे ॥१४॥ तद्दै वच किलो जातो शतमन्युर्दिवस्प
तिः ॥ किं करोमि क्व गच्छामि न ज्ञातं मां जनार्दनात् ॥१५॥ एवं संचिंत्य मनसा युद्धाय कृतनिश्चयः ॥ देवसै
न्यैः परिवृतो भुवं यातो क्षणाद्धरिः ॥१६॥ सागरैस्सहस्रसाहस्रो देवानामधिपः स्वयं ॥ उद्दिश्य पाश्वहरणे
वीक्ष्यं तस्ते तदंतिकं ॥१७॥ नमस्कृत्वा समं वाक्यमब्रुवंस्ते सगरात्मजाः ॥ किमर्थमागतः स्वामिन् निजलो
काच्छचीपते ॥१८॥ एवं तेषां वचः श्रुत्वा क्रोधप्रस्फुरिताधरः ॥ ईद्रउ० ॥ परं हंतुं समुद्युक्तो शश्वतं मम
सांप्रतं ॥१९॥ वंचकाद्दवभावंतो मधुरं परमं वचः ॥ उक्तैवसहस्रा देवा निजघ्नुः परसैनिकान् ॥२०॥ तीव्रं प्र
वृत्तं तुमुलं युद्धं सर्वभयप्रदं ॥ बाणैर्बाण्ण्व स्तत्याश्च स्त्रेरस्त्रैरंशौ स्त्रान्यवारयत् ॥२१॥ युद्धं तत्राभ
वद्धोरं बाणैर्व्याप्ता दिशो दश ॥२२॥ नाबोध स्वात्म परयो निर्भमुः सर्व एव ते ॥ देवा देवान् हनिष्यंति
संगत्या सागरा युजैः ॥२३॥ एवं न बुबुधे तत्र स्वकीयमपरं परं ॥ देवबालाभवत्ताव त्संगासागरवाहि
नी ॥२४॥ याता दशदिशो योद्धास्य क्वा रणभुवं द्विजाः ॥ सागराः क्रोधसंतप्ता स्तदाशस्त्राण्ययोजय १२

न् ॥२५॥ तद्रूपा देवता वृंदै पलायनपरोभवत् ॥ इंद्रै कोग जमारूढो सागरास्ते सहस्रशः ॥२६॥ तैश्च
योद्धुमशक्तोसौ पलायनपरो भवत् ॥ चिंतया परया व्यग्रो वासुदेवमयाययौ ॥२७॥ देवराजे गते यु
द्धात्सगरात्मजसैनिकाः ॥ समाजग्मुर्निवेशाय स्वामिनो गोष्ठ[illegible]तं ॥२८॥ दत्ता तेषां च बहूनि वस्त्रा
ण्याभरणानि च ॥२९॥ इति श्रीभविष्यपुराणे ज्येष्ठमाहात्म्ये [illegible] ध्यायः ॥१२॥ ॥श्री॥ स्कंद उवाच ॥
निवेद्य वासुदेवाय सर्वसागरचेष्टितं ॥ भावितं मनसा ध्यात्वा इदं वचनमब्रवीत् ॥१॥ भगवानुवा ॥ अहमे
वाशीवो वापि योद्धुं नेशास्तु तैः सह ॥ अतस्ते कथयिष्यामि तत्कुरुष्व यथामति ॥२॥ इमां मह्द्रूपकर
णीं विद्यां दास्यामि सुव्रत ॥ तां गृहीत्वा पुनर्याहि एकाकी निर्भयः शुचिः ॥३॥ तां जपस्व विधानेन अश्वं
ध्रतो प्रयत्नतः ॥ कपिलस्यांतिकं गच्छ तथैव मौनमास्थितः ॥४॥ तत्रैवस्थापयित्वा तं हयराजं सुखा
वहं ॥ ततो गच्छान्ति सजपं स्वकार्यं कुरु पूर्ववत् ॥५॥ नोचेत्वां ते हनिष्यंति मया सह न संशयः ॥ इति वा
क्यं भगवतो श्रुत्वास्ताला विधानतः ॥६॥ अहृद्रूपकारिणीं विद्यां जग्राह मधुसूदनात् ॥ प्रणम्याथ
पुनः प्राह कृत्वा तत्कपिलो मुनिः ॥७॥ भगवानु ॥ कालिंद्याः पूर्वदिग्भागे वसुधापागुहांतरे ॥ नि

ज्येष्ठ॰
१४

निर्मितं भृगुणा तेन स्थानं पातालसद्दशीं ॥८॥ तत्रास्ते ध्यानसंपन्नो कपिलो मुनिनां वरः ॥ स्थलेवैं भग
वद्वाक्यमिंद्रोभ्यागाद्धयांतिकं ॥९॥ जपन्नभगवतो द्दिष्टां विद्यांतां ऋषिदेवतां ॥ गृहीत्वाश्वोपययौ
तूर्णं न कोपि बुबुधे तदा ॥१०॥ इंद्रोपि कपिलं दृष्ट्वा एकांते ध्यानसंस्थितं ॥ प्रणम्य विधिवत्तत्र बध्वा तं
हयसत्तमं ॥११॥ इंद्रोपि भयसंत्रस्तो चेतसा शंकितो भृशं ॥ गते हयपतौ तत्र भ्रामिता हयरक्षकाः ॥१२॥
नृपं निवेदयामासुः सर्वे ज्ञानविमोहिताः ॥ क्वगतो केन नीतो वा नाविद्मो वसुधाधिप ॥१३॥ तेषां गद्दव
नं श्रुत्वा ततः सगरनंदनाः ॥ गतास्ते दशदिग्भागे द्रष्टुं हयपतिं द्विजाः ॥१४॥ सर्वं महीतलं दृष्ट्वा द्र
ष्टुं स्वर्लोकमाययुः ॥ नाक्षत्रलोकमासाद्य ऐंद्रीं पुरीमथाविशन् ॥१५॥ संज्ञयाकुलवित्तैस्तैर्दृष्टं प्रति
गृहं ततः ॥ एवमैंद्रीं पुरीं दृष्ट्वा तथान्येषां पुराणि च ॥१६॥ प्रासादान्सर्वशालांश्च वनान्युपवनानि
च ॥ दिक्पालानां तथा लोकान् ब्रह्मलोकमतः परं ॥१७॥ कैलासं [illegible]मवंतं च तथान्यान्पर्वतान्बहून् ॥ मे
रोश्चापि गुहाः सर्वा शिखराणि च सर्वशः ॥१८॥ गंधर्वयक्षलोकं च विष्णुलोकमतः परं ॥ एवं सर्वे समाक्रो १४
ताः लोकाः सगरनंदनैः ॥१९॥ न ते प्राप्ता हयं तत्र ततः पातालमाययुः ॥ पातालानि ततः सप्त दृष्टेव

शाविरंपयुः ॥२०॥ ततस्ते दुःखिताः सर्वे सत्तुं प्राणान्समागताः ॥ भुवं विदारयामासुस्ते सर्वे काल
चोदिताः ॥२१॥ अकस्माद्विपरत्नोद्धलं गह्वरं चातिविस्तरं ॥ [illegible]तेंद्रालयसंकाशं मानवैः परिवर्जि
तं ॥२२॥ दृष्ट्वा ते गह्वरं दिव्यं विविशुश्च सहस्रशः ॥ ददृशुस्ते ह[illegible]रं बद्धं कनवदूर्वाभमभिः ॥२३॥ ततः क
पिलनामानं ऋषिं ध्यानपरायणं ॥ मनसाप्यरिसंहार शापानुग्रहकारिणं ॥२४॥ अविज्ञातप्रभावै
स्तैर्दस्युं मत्वा विचक्षणैः ॥ अनेनैव हृतोश्वोयं नध्यान्यस्तो भयात्किल ॥२५॥ मद्भ्या द्रु गुहां कृत्वा ऋ
षिवद्रूपतैः खलैः ॥ एवमुक्त्वा तु तैः सर्वैः कृतः कोलाहलो महान् ॥२६॥ बध्वा तं कपिलं मूढास्ताडयामासु
केचन ॥ ध्यानं विसृज्य स मुनिर्यावत्तान्ददृशेखिलान् ॥२७॥ तावत्तत्राग्निना दग्धा जाताः सगरनंद
नाः ॥२८॥ इति श्रीभविष्यपुराणे ज्येष्ठमाहात्म्ये त्रयोदशोध्यायः ॥१३॥ ॥श्री॥ ऋषय ऊचुः ॥ सर्वे भस्मत
मापन्ना सगरस्य च संततिः ॥ आरभ्य यज्ञं नृपतिः किमकारि षडानन ॥१॥ सैनिकाश्चापि किं जग्मुस्तत्स
र्वं कृपया वद ॥ स्कंद उ॰ ॥ बिलादग्रस्थिता ये च वै सैनिकाः भयविह्वलाः ॥२॥ बिलाग्निज्वालया तप्ता नृपं या
ता निवेदितुं ॥ वृत्तांतं कथयामासुस्ते लोचनस्य जयादिकं ॥३॥ परा न दृष्टं कुत्रापि हयरत्नं तथात्मजाः ॥ त

देवखनिताश्चोर्वी सर्वैश्चैषा स्तबाहुभिः ॥४॥ तत्रैव विवरं लग्नं शतयोजनविस्तृतं ॥ तत्र प्रविष्टास्ते सर्वे
बहुभिः सैनिकैः सह ॥५॥ नोद्यापि ते लभद्वारं गतास्ते बहुधा सरं ॥ तत्र तैः किं कृतं राजन्नूनर्षिमोद्दी
रमाश्रिताः ॥६॥ अकस्माद्दुन्हिनाख्या तं बिलं पातालसन्निभं ॥ वयं तऽऽचालया बाधाभीताघाता
निवेदितुं ॥७॥ कथं तेषां गतिर्जाता न जानीमो विमोहिताः ॥ इति तद्वचनं श्रुत्वा वज्राहत इवाचलः ॥
८ ॥ आसनात्पतितो भूमौ निश्चेष्टह्यत क्षणात् ॥ अमात्यामंत्रिणः सर्वे हाहाकारं प्रचक्रिरे ॥९॥ उत्था
पयित्वा नृपतिं वारिभिश्च मुखं बुधाः ॥ सिषिंचुः सुस्थिरं कृत्वा ऊचुस्ते ऋषिगादयः ॥१०॥ मा शोचं नृप
शार्दूल सर्वे तव हिते रताः ॥ शोकं नैव प्रकुर्वंति पुरुषा वीर्यशालिनः ॥११॥ भवान्नूवपंचस्थ्वा वीरा गच्छामो
तद्बिलांतरे ॥ एवं विनिश्चयं कृत्वा शोकं रोषं समाप्य च ॥१२॥ सर्वे विनिर्गता द्रष्टुं तद्बिलं लसुराक्रमं ॥
मार्गन्ते दुर्गमामासु दैवैरपि सुदुष्करं ॥१३॥ वसुधापातलं[illegible]चांतं तत्कुहरावधि ॥ अस्त ऋषीगणाः
सर्वे नृपेन च विजानतः ॥१४॥ एता गर्ताः सुविस्तीर्णा भविष्यंति हि सागराः ॥ एवं विवदमानास्ते अगता
गुहरांतिकं ॥१५॥ बलं तत्रैव संस्थाप्य ऋषिभिः सह धर्मवित् ॥ प्रयतः प्रययौ राजा भगरद्दूपरमाद्भुते ॥ १५

॥१६॥ तद्दिव्यं भुवनाकारं रत्नदीपैः सुदीपितं ॥ भूतसंचाररहितं भस्माभिश्च समावृतं ॥१७॥ पश्य पन्नृपश्य
नृशानैर्यीतास्तस्य बैत्रांतिकं द्विजाः ॥ तं दृष्ट्वा तेऽसाप्यार्तं ज्[illegible]तमिव पावकं ॥१८॥ जाटिलं परमात्मा
नं ध्यायंतं वागगोचरं ॥ कपिलेति चिराप्रुसा नसास्तोतुं प्रच[illegible]ः ॥१९॥ सैनिका ऊचुः ॥ जयानित्यपरा
नंद जगद्योनिस्वरूपिणे ॥ मनसा सृष्टिसंहारकारिणे ते नमो नमः ॥२०॥ नमो गुणविशिष्टाय हारेरू
पायते नमः ॥ नमस्त्रिगुणरूपाय रजोगुणवते नमः ॥२१॥ तथा तमःस्वरूपाय शिवरूपाय वै नमः ॥
नमो नमस्ते खिललोकवंद्य सुरासुरैरर्चितपादपद्म ॥२२॥ दयानिधे पाहि भवाब्धिमग्नं क्षिप्रं समभ्यु
द्धर मां सुरेंद्र ॥ शोकांबुराशौ पतितं विशाले ऽगाधे तथा तीरविवर्जिते च ॥२३॥ महीं समामुद्धर दीन
बंधो यतस्त्वमेवादिवराहरूपी ॥ स्तुत्वैवं समरे राजा पुनः शोकसमावृतः ॥२४॥ पपातात्वलवद्भूमौ वृष्टि
काले महाचलः ॥ कपिलोपि च तत्रासीद्ध्यानपनो न्मील्व्य निश्चितं ॥२५॥ नृपं सैन्यगणैर्युक्तमिदं वचनमब्रवी
त् ॥२६॥ इति श्री भविष्यपुराणे ज्येष्ठमाहात्म्ये चतुर्दशोध्यायः ॥१४॥ ॥श्री॥ कपिल उवाच ॥ के यूयं कुत आ
याता किमर्थं मम संनिधौ ॥ सैनिका ऊचुः ॥ भगवन्सगरो नाम नृपो परमधार्मिकः ॥१॥ तवाग्रे पतित

ज्येष्ठा॰
१६

श्रायं शोकदुःखसमावृतः ॥ शृणु यत्कारणं तस्य ज्ञानमस्त्वखिलं तव ॥२॥ राज्ञा कृता हयमखा महेंद्रो
पि जितो रणे ॥ पुत्रैः षष्टिसहस्त्रैश्च बलिभिः परिवारितः ॥३॥ ततः शतमखः मध्ये हयं पुत्रश्चातैर्वृतं ॥ ब
हुभिः सैनिकैः सार्द्धं मुमोच जगतीतले ॥४॥ भ्रममाणे हये कस्मादंतर्धानं जगाम सः ॥ गते हयपतौ
वीरा दृष्ट्वा त्रैलोक्यमभ्रामितं ॥५॥ उर्वीतलं तदारयातं सकलं कुहरावधि ॥ ततस्ते विवरं लग्नं तत्रयाता
सहस्त्रशः ॥६॥ अत्राग्निनेव नेदग्ध्या कृतांतं ऋषिसत्तम ॥ तेषामन्वेषणार्थाय ययं यातास्तवांतिकं ॥
७॥ तच्छ्रुत्वा कपिलः प्राह ज्ञातास्ते सर्वे समाधिना ॥ शक्रेणेदं कृतं कर्म गच्छध्वं गितेनच ॥८॥ मदग्रे स्था
पितश्चाश्वः शक्रः स्वभुवनं गतः ॥ राज्ञा नो राजपुत्राश्च सहसा स्य रक्षकाः ॥९॥ दस्युं मां मन्यमानास्ते
पीड्यामासुरन्वहं ॥ ततः क्रोधाग्निना दग्धा न मया बुद्धिपूर्वकं ॥१०॥ एवमुक्त्वा ऋषिवरो क्रोशांतं तेन
राधिपं ॥ उत्थापयित्वा स्वकरैः परिमार्ज्य मुखांबुजे ॥११॥ उवाच मधुरं वाक्यं मा भैषीति द्विजोत्तमः ॥
गछवत्स निजं राज्यं पूर्णस्तवशातक्रतुः ॥१२॥ भविष्यति महे[illegible]संनिश्चितं मदनुग्रहात् ॥ इंद्रस्य दुष्ट
बुद्धित्वाद्रक्षित्वायां मतिर्भवेत् ॥१३॥ गोतमात्प्राप्यगंग पंच भविष्यति भगांकितः ॥ इति दत्वा वरं तस्य १६

शापं वै वशात ऋतौ ॥१४॥ पुनरप्यतिप्रीतेन मनसा च वरं ददौ ॥ तव ज्येष्ठस्य पुत्रस्य या सती स्याद्वरांगना
॥१५॥ तस्याः पुत्रो भवेन्नूनं शूरः सत्यपराक्रमः ॥ भगीरथेति विख्यातो सावेत कुलभूषणः ॥१६॥ शा
स्त्रास्त्रविद्याकुशलो नीतिज्ञो सत्यधर्मशुचिः ॥ जित्वा वसुम[illegible]र्णां दुष्करं तप आचरेत् ॥१७॥ प्रभा
वात्तस्य तपसो आनइष्यति जान्हवी ॥ स्वर्लोकाद्दिव्यसरित पितृणां तारणाय च ॥१८॥ तस्यां बुक
णिकास्पर्शा दिव्यदेहा भवंतिहि ॥ तथा सह गमिष्यंति वैकुंठं विष्णुमंदिरं ॥ यतो भगीरथेनासौ आ
नीता वसुधातले ॥ भागीरथीति विख्यातीत सादि परमां दधो ॥१९॥ इति श्रुत्वा गिरं तस्य कपिलस्य
महात्मनः ॥ ऋषिभिः सह तं पूज्य नमस्कृत्वा ययौ परं ॥२०॥ ततः कष्टेन बहुना नीयमाने दिने सति ॥
अथैकस्मिन्सुदिवसे प्रसूता सुभगा सती ॥२१॥ पुत्रं बहुगुणोपेतं जयंतमिव चापरं ॥ वसिष्ठेन स
मारभ्य जातकर्मादिकं करोत ॥२२॥ दत्तादानानि बहुशो गोदानानि बहूनि च ॥ तथान्येभ्यो जनेभ्यश्च
वस्त्राणि च धनानि च ॥२३॥ भगीरथेति तन्नाम चकार द्वादशे हनि ॥ दिने दिने यथ वर्धे शुक्लपक्षेय
[illegible] ॥२४॥ ततश्चकार विधिवत् चौलोपनयनक्रिया ॥ अभ्यासः सर्वविद्यानां वाजीरथगजादि

ज्येष्ठ॰
१७

त्र्यंगं शोकं कृत्वा नैमोपि सर्वो सांकुरा।ऽतोभून्नृपास्वजः॥ एवं षोडशको वर्षो जातः पूर्णो दिलीपपि
गरि७॥ दृष्ट्वा तं सुगुणैः पूर्णं राज्ययोग्यं महौजसं॥ मंत्रिभिः सह संगम्य दद्दौ राज्यं सुताय वै॥२८॥
ततः पैतामहं राज्यं लब्ध्वा स च भगीरथः॥ पुत्रवत्पालयामास सकलं धरणीतलं॥२९॥ ततस्स सग
रो राजा निर्वृतिं परमामवान्॥३०॥ इति श्रीभविष्यपुराणे ज्येष्ठमाहात्म्ये पंचदशोध्यायः॥१५॥ ॥श्री
स्कंद उवाच॥ ततो भगीरथो राजा कृत्वा राज्यमकंटकं॥ वृत्तं शृण्वन्च पितृभ्यो उदासीनो बभूव ह॥
॥१॥ राज्येदं अंशुकोशं स्थापयित्वा पितामहे॥ गृहीत्वाज्ञां ययौ शीघ्रं तपस्तप्तुं सुदारुणं॥२॥ हिमवमु
द्धिंतपतपता। निराहारेण तिष्ठता॥ विद्यापंचाक्षरीं नाम जपता स्थीरचेतसा॥३॥ तिष्ठता वै कपादेन द
शवर्षाण्यहर्निशं॥ तोयाहारवता तद्वद्वाय्वाहारवतां तथा॥४॥ एवं कृतवता तेन नीतः कालो म
हान्॥ ततैव स्वयमायातो साक्षीवो भक्तवत्सलः॥५॥ वरं दातुं [illegible]आयातास्तस्य भाक्तिवशीकृतः॥ शि
वं दृष्ट्वा प्रणम्योच्चैर्मधुरं वाक्यमब्रवीत्॥६॥ भगीरथ उ०॥ [illegible]शिंभो नमस्तुभ्यं सर्वेषां सुखदायक॥
नमस्ते जगतां नाथ विश्वकर्त्रे नमोस्तु ते॥७॥ रजोगुणस्य रूपाय लोकानां पतये नमः॥ सत्वात्मने सर्व १७

हर्त्रे तामसाय नमो नमः॥ कर्मणां फलदात्रे च भुक्तिमुक्तिप्रदाय च॥ मनोवागतिरूपाय ब्रह्मभूता
यतेनन्नतो॥९॥ अंतर्वपुर्निरुंधानयोगिने ध्यानरता।लिने॥ निरीशाय नमस्तेस्तु क्षेत्रज्ञाय नमो नमः॥
१०॥ शिव उ०॥ वरं वरय राजेंद्र यत्तेस्ति मनसेप्सितं॥ नृप उ०॥ [illegible]श्चे। दिव मह्यं त्वं भक्तिं देहि हृदा
तव॥११॥ पितॄणांच विशुध्यर्थं गंगामानयनं कुरु॥ शिव उ०॥ स्वर्गे तिष्ठति सा गंगा नाहमानयितुं
क्षमः॥१२॥ प्रसन्नं कुरु देवेशं विष्णुं त्रैलोक्यवंदितं॥ येनोपायेन तोक्षिप्रं विष्णुसान्निध्यमाप्स्यसि
॥१३॥ तदहं ते प्रवक्ष्यामि व्रतं परमगोपितं॥ पुरारविः शिवो विष्णुं स्तुत्वा स्तोत्रैः प्रसादितं॥१४॥ कृत्वा
प्रसन्नं तज्ज्ञोप्यं वक्ष्यामि तव हेतवे॥ इदं गोप्यं भगवता गोपितं बहुवासरं॥१५॥ तदद्यते प्रवक्ष्यामि
तत्कुरुष्व विधानतः॥ ज्येष्ठे मासे समुत्थाय स्नात्वा प्रातर्यथाविधि॥१६॥ त्रिविक्रमं मया भ्यर्च्य पंचा
मृतैश्चापि साधनं॥ दधिभक्तैश्च ब्राह्मणेभ्यो जलदानं तथापरं॥१७॥ कुरुष्वैवं मासमात्रं ततः प्रीतो भ
वेद्धरिः॥ आनइष्यति तां गंगां सर्वपापहरां शुभां॥१८॥ शिवस्य वचनं श्रुत्वा तत्तथाकार भगीरथः॥
तस्यानुष्ठानमात्रेण विष्णुसांनिध्यतां गतः॥१९॥ स्तुत्वा नत्वा हरिं याचे गंगां परमपावनीं॥ ह

ज्ये॰ मा॰
१८

रिरु॥ याहि भद्रे मया सार्द्धं मंदाकिन्यास्तटे शुभे॥ कुरुष्वात्र जपं होमं स्नानं च द्विजतर्पणं॥ अनेच्युन
शनैस्तत्र भक्तियुक्तेन चेतसा॥२१॥ संवत्सरं कुरुश्रेष्ठ एवं पृथ्वीं यास्यति भूतले॥ विष्णोश्च वचनं तथ्यं
मत्वा सार्धं जगाम सः॥२२॥ मंदाकिन्यास्तटे रम्ये स्थित्वा वृत्तं तदनुष्ठितं॥ चकार परया भक्त्या तत्रातुष्टा
सरिद्वरा॥२३॥ आविर्भूता यतस्याग्रे स्त्रीरूपा चारुहासिनी॥ ज्ञात्वा तां त्रिपथां गंगां तुष्टाव भक्ति
पूर्वकं॥२४॥ मंदाकिनी ततस्तुष्टा वरं गृह्णीति चाब्रवीत्॥ एहि भद्रे मया सार्धं भूतले पितृमुक्तये॥
२५॥ तथेत्युक्त्वा ययौ तेन सा सार्धं सा वसुधातले॥ प्रतिगर्जे निर्गता सा दशम्यां बोधरूपिणी॥२६॥
अवतीर्णा च सुमती लोकानां पावनाय च॥ अतः सा दशमी पुण्या ख्याता दशहरेति च॥२७॥ ततस्त
स्या जलैर्दिव्यैः पितरः प्लाविता द्विजाः॥ दिव्यदेहधराः सर्वे गतास्ते विष्णुमंदिरं॥२८॥ इति श्रीभ
विष्यपुराणे ज्येष्ठमाहात्म्ये षोडशोऽध्यायः॥१६॥ ॥छ॥ व्यास उवाच॥ ज्येष्ठे मासि नृपश्रेष्ठ याशु
क्लैकादशी भवेत्॥ निर्जलं समुपोष्यात्र जलकुंभान्सशर्करान्॥१॥ प्रदाय विप्रमुख्येभ्यो मोदते विष्णु
सन्निधौ॥ युधिष्ठिर उ०॥ श्रुता मे मानवा धर्मा वैदिकाश्च मया श्रुताः॥२॥ द्वैपायन मम ब्रूहि धर्मान्वै १८

ख्यान्स्तथा॥ व्यास उ०॥ श्रुता ये मानवा धर्मा वैदिकाश्च तथा श्रुताः॥३॥ कलौ युगे न शक्यं ते धर्मा नरक
गुं नराधिप॥ सुखोपायमल्पधनमल्पक्लेशं महत्फलं॥४॥ पुराणानां च सर्वेषां सारभूतान्
वदामि ते॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि॥५॥ एकादश्यां न भुंक्ते यो न याति नरकं तु सः॥
व्यासस्य वचनं श्रुत्वा कुंतिपुत्रः पापमब्रवीत्॥६॥ भीमसेन महाबाहो भीतोहमिति चाब्रवीत्॥ भीम
उ०॥ पितामह असक्तोहमुपवासे करोमि किं॥७॥ ततो मे सुलभं ब्रूहि व्रतमेकं सुखावहं॥ व्यास
उ०॥ वृषस्थे मिथुनस्थे वा शुक्ला एकादशी भवेत्॥८॥ ज्येष्ठमासे प्रयत्नेन सोपोष्या जलवर्जिता॥ स्ना
ने वा चमने चैव वर्जयेच्चोदकं बुधः॥९॥ उपभुंजीत नैवात्र व्रतभंगोन्यथा भवेत्॥ उदयादुदयं यावद्व
र्जयित्वा जलं बुधः॥१०॥ अप्रयत्नादवाप्नोति द्वादशद्वादशीफलं॥ ततः प्रभाते विमले द्वादश्यां स्नान
माचरेत्॥११॥ जलं दत्वा द्विजातिभ्यो भोजनं च यथाविधि॥ भुंजीत कृतकृत्यस्तु ब्राह्मणैः सहितो व
शी॥१२॥ एवं कृते तु यत्पुण्यं भीमसेन शृणुष्व तत्॥ संवत्सरस्य मध्ये तु एकादश्यो भवंति ताः॥१३॥ ता
सां फलमवाप्नोति प्रस्तुतेनात्र संशयः॥ मां चैव हृषीकेश शंखचक्रगदाधर॥१४॥ जपस्य तपसश्चै

ज्येष्ठ.
१९

वफलं प्राह जनार्दन ॥ एकादश्यां सितेपक्षे ज्येष्ठस्योदकवर्जितं ॥ १५ ॥ उपोष्य फलमाप्नोति तच्छृणुष्व
वृकोदर ॥ सर्वतीर्थेषु यत्पुण्यं सर्वतीर्थेषु यत्फलं ॥ १६ ॥ सर्वं होमेषु यत्पुण्यं तत्तस्याः समुपोषणा
त् ॥ संवत्सरे च यावंस्युः शुक्लाकृष्णा वृकोदर ॥ १७ ॥ उपोष्यास्ताश्च सर्वाः स्युरेकादश्योन संशयः ॥
धनधान्यवहा पुण्या पुत्रारोग्यप्रदास्तथा ॥ १८ ॥ उपोषिता नरव्याघ्र इति सत्यं ब्रवीमि ते ॥ यम
दूता महाकाया कराला कृष्णरूपिणः ॥ १९ ॥ दंडपाशधरा रौद्रा मरणे दृष्टिगोचराः ॥ न प्रयांति
नरव्याघ्र एकादश्यामुपोषणात् ॥ २० ॥ पीतांबरधराः सौम्याः चक्रहस्ता मनोजवाः ॥ अंतकाले
नयंते नं वैष्णवा वैष्णवीं पुरीं ॥ २१ ॥ तस्मात्सर्वप्रयत्नेन उपोष्या जलवर्जिता ॥ जलधेनुं ततो द
त्वा सर्वपापैः प्रमुच्यते ॥ २२ ॥ ज्येष्ठमासे नरश्रेष्ठ्या शुक्लैकादशी शुभा ॥ निर्जलं समुपोष्यात्र
जलकुंभान्सशर्करान् ॥ २३ ॥ प्रदाय विप्रमुख्येभ्यस्ता [illegible] पापविवर्जिताः ॥ विष्णुलोकमवाप्य
ते मोदंते विष्णुसंनिधौ ॥ २४ ॥ इति श्रीभविष्यपुराणे ज्येष्ठमाहात्म्ये सप्तदशोध्यायः ॥ १७ ॥
श्री ॥ ॥ भीमसेन उ० ॥ इत्येवं कथितं तात माहात्म्यमपि चाद्भुतं ॥ सत्यं भाति न मे तात जनतं मो १९

हचेतसः ॥ १ ॥ तस्मात्कथयमे संसस्याच्छेत्स्यंते ससभावन ॥ नोचेत्र मिथ्याध्यामि विदुरस्य
वचो यथा ॥ २ ॥ मंत्री पुरोहितो वैद्यस्त्रयो यस्यापि यं वदः ॥ तस्य त्री घ्रं विनश्यंति कोशो धर्मक
लेवरं ॥ ३ ॥ व्यास उ० ॥ कथितं यन्मया पूर्वं तत्तव सर्वं समास [illegible] नान्नतं तद्द्विजा ज्ञानी हि सर्वं यापवना
त्मजः ॥ ४ ॥ अत्रते कथयिष्यामि इतिहासं पुरातनं ॥ यस्य श्रवणमात्रेण संशयस्ते गमिष्यति ॥ ५ ॥
पुराकालांजनगिरौ पुलिंदो नाम विश्रुतः ॥ राजा स कुलधर्मज्ञो लसाधर्मपुरं महत् ॥ ६ ॥ अनेक
रथपत्तीका गजैरैरावतोपमैः ॥ उच्चैश्रवसमैरश्वैर्बहुभिः परिवारितः ॥ ७ ॥ निर्गतो जयया
त्रायै साचिवैरनुमोदितः ॥ तदायुयोज विस्तीर्णा वाहिनी प्रययौ पुरात् ॥ ८ ॥ तिर्यकूपश्च्याततो
भूता छादयंती रसातलं ॥ स प्रत्यग्रहाप्ययो सेनाय थासप्तमहाध्वयः ॥ ९ ॥ जिता मंडलिका
वीरा राजानो राजसेवकाः ॥ तेभ्यो गृहीत्वा विपुलं करं च स्वपुरं विशन् ॥ १० ॥ तथैव जित्वा भू
लोके राजानश्चक्रवर्तिनः ॥ यं यं सेनापतिं वीरं शृण्वोति स्म बलीयसं ॥ ११ ॥ तं तं जित्वा पु
लिंदो वै बलेन मदगर्वितः ॥ एवं पर्यटतस्तस्य चारैर्ज्ञात्वा निवेदयत ॥ १२ ॥ अस्ये कस कु

ज्येष्ठ॰
२०

लाधीशो राजा परमधार्मिकः ॥ श्रुतिस्मृतिपुराणज्ञो देवतातिथिपूजकः ॥ १३ ॥ शूरः सत्य
प्रतिज्ञश्च नैनकेन विनिर्जितः ॥ तं वीनिर्जित्य भूलोके तेन कीर्त्तिः सुतो दिशि ॥ १४ ॥ इति
तद्वचं नेश्वत्वा पुलिंदो मंत्रिभिः सह ॥ वाहिनी सहितस्तूर्णं ययौ प्राचीनबर्हिषं ॥ १५ ॥ न
गरं परितो व्याप्य स्थितास्ते सैनिका भृशं ॥ यथावकाशं सैन्यानां वसन्तं घोषनांतरे ॥ १६ ॥
ततः कोलाहलो जातः पुरमध्ये तपोधनाः ॥ राजानं केचिदाचख्युर्मंत्रिणश्चापरे तदा ॥ १७
ज्येष्ठस्येवाद्दशी शुक्ला आसीत्तस्मिन् दिने नृप ॥ सर्वे स्नाताः समुदिताः विष्णुपूजारताश्च
ते ॥ १८ ॥ परस्परं नन्वोचुस्ते सर्वे तद्गतमानसाः ॥ पुलिंदसैनिकाः सर्वे तद्ग्रामं विविशुर्भृशं ॥ १९ ॥
विलुंठनपराः सर्वे न कोपि तान्यवारयत् ॥ पुलिंदश्चनम[illegible]स्य केनापि ग्रामवासिना ॥ २० ॥ समा
श्राव्यमुवाचेदं संयोप्यक्रूरसंपुटं ॥ अद्य जाति नृपश्रेष्ठ सुपर्ण्येकादशीव्रतं ॥ २१ ॥ उपास्यते
नागरिकैः स्वदशाक्यान्नृपते खिलैः ॥ नाद्याहारो न बालानां नाहंसानां न तत्तथा ॥ २२ ॥ नैवदो
षहेतं कर्म क्रियते प्रभुणा सह ॥ तस्मात्क्षमर्धं नृपते अद्यैवेदं यांकुरु ॥ २३ ॥ नाहं नृपा २१

ज्ञया यातो वशामीन निविध्यते ॥ दिनद्वये तदा किंचित् क्रियते तद्धाभिव्यति ॥ २४ ॥ स्वस्थः किं
भविष्यति तन्नजानामि भो नृप ॥ २५ ॥ इति श्री भविष्यपुराणे ज्येष्ठमाहात्म्ये अष्टादशोध्यायः ॥
१८ ॥ ॥ छ ॥ व्यास उवाच ॥ इति तस्य वचः श्रुत्वा पुलिंदो ग्रामवासिनः ॥ उवाच रुदपरीता
त्मा गर्हयन्स्वेन तेजसा ॥ १ ॥ कुर्यं येकादशी नाम क्रियते नृपकिं व्रतं ॥ मोघं जल्पसि मूढो सि
लं गच्छ स्वनिजालयं ॥ २ ॥ नोचेसौ ताडयिष्यंति दूताः परमदारुणाः ॥ ततस्ते सैनिकाः सर्वे
प्राविष्टो नगरांतरे ॥ ३ ॥ बध्वा गृहकपाटानि पणिजानां महात्मनां ॥ निन्युः समस्तभांडादी
न्वस्तुजातं शनैः शनैः ॥ ४ ॥ तथैव धनिकानां च गृहाल्लीतं महद्धनं ॥ एवं प्रति गृहं व्याप्तं शस्त्र
धारैश्च सैनिकैः ॥ ५ ॥ कंदमूलं फलं तोयं नलब्धं पुरवासिभिः ॥ एवं चैवोपोषणं जातं प्राणिनां
जलवर्जितं ॥ ६ ॥ हाहाकारः समभवत्तस्मिन्नगरांतरे ॥ ६ ॥ हृष्टयो भगवान् विष्णुर्गोलोके पकि
तो भवत् ॥ संध्यां तरक्षपोतस्थो फणींद्रभोगसंस्थितः ॥ ७ ॥ आहूय गरुडं तत्र शुद्धांससकं तं
दा ॥ आरुह्य तं ययौ तूर्णं निर्मोच्य विविधांश्च मु ॥ ८ ॥ त्रिनेत्रौ सप्तहस्तांश्च चतुष्पादो महाभुजो ॥
गतेस्तंचं उग्रूरणे बालेपि पयवर्जिते ॥ ९ ॥

ज्येष्ठ॰
२१

दंतुरां त्रिशिरस्कां च द्विपक्षां दशपक्षकां ॥९॥ षड्वक्त्रां पंचवक्त्रां च गजवक्त्रां गजाकृतिं ॥ सिं
हवक्त्रां महाघोरां नृसिंहमिव भीषुरां ॥१०॥ सिंहरवां रक्तमुखां महिषासुरसुदृशां ॥ करालां
विकरालां च नीलांजनसमप्रभां ॥११॥ ऊर्ध्वकेशां दिग्वसनां नरमुंडधरां तथा ॥ अंत्रमाला
धरां केचिद्द्वीपिचर्मपरिवृतां ॥ अदृष्टपूर्वां मनुजैर्दृष्ट्वा वाज्ञां तदा विभुः ॥ स पापधमपुलिंदस्य
सबलस्य ममाज्ञया ॥१२॥ नाशं कुरुध्वमचलेन यावल्लोदेति भास्करः ॥ एवमाज्ञापितास्तेवै प्रवि
ष्टाः परसैनिकान् ॥१३॥ जघ्नुस्ते शस्त्रसंपातैः कोलाहलस्तदाभवत् ॥ केचिच्छिन्नाश्च निहताः
केचित्खड्गैर्हतास्तथा ॥ व्यादर्शनैर्दंशिताश्चान्ये भक्षिताश्च तथा परे ॥ पलायनपरान्यादेध्वस्ता
तान्पातयन्स्तदा ॥१५॥ एवं प्रतापतो वीरा निहता भक्षिताः पुरा ॥ रथाश्वसादिनो वा हादर्शनैश्चार्वि
ताभृशं ॥१७॥ शिबिराणि च दग्धानि सकाशास्तत्र चाभवत् ॥ तदा विशिस्मिरे सर्वे कृत्यसंकुलआ
गताः ॥१८॥ न वै तेमानवा वीरा नेक्षिता यत्र कुत्रचित् ॥ इति बुध्वा ततः सर्वे पलायनपराभवन् ॥ २१
१९॥ दृष्ट्वा पलायनपरान् पृष्ठलग्ना निजघ्नुः ॥ एवं ते निहताः सर्वे पुलिंदस्य च सैनिकाः ॥२०॥

पुलिंदोपि ययौ योद्धुं क्रोधाद्विष्णुगणैः सह ॥ यामार्द्धमकरोद्युद्धं शस्त्रैरस्त्रैश्च दारुणैः ॥२१॥ न सम
र्थो यदा योद्धुं तदा मनसि चिंतयत् ॥ पलायनमितः कुर्यां विधिच्छंदेन संशयः ॥२२॥ इति निश्चित्य मन
सि मेघास्त्रं सकृवान्स्वयं ॥ ध्वांतं तत्र भवद्घोरं ववर्षुश्च घना [illegible] ॥२३॥ ववुः प्रचंडपवनास्तदा सर्वे वि
मोहिताः ॥ विमर्षुः सर्वकामेभ्यो तास्थिवा स्खलत्स्खलेस्खले ॥२४॥ पुलिंदो हयमारुह्य पलायनपरोभवत्
॥ ततः प्रभातसमये उत्थिता विस्मिता भृशं ॥२५॥ नापश्यद्वाहिनीशत्रोः स्वभयास्तीति निश्चितं ॥ प्रातः
स्नानादिकं चक्रुः पारणं हरिवल्लभाः ॥२६॥ पारणांते बहिर्याता दृष्टुं तत्कौतुकं महत् ॥ अनेकानि प्रे
तानि पतितानि रणाजिरे ॥२७॥ इति श्रीभविष्यपुराणे ज्येष्ठमाहात्म्ये एकोनविंशोध्यायः ॥१९॥ ॥छ॥
ऋषय ऊचुः ॥ आश्चर्यं च त्वया ख्यातं सर्वेषां मोहनाशनं ॥ माहात्म्ये ज्येष्ठमासस्य एकादश्याः प्रभावतः ॥
॥१॥ नद्दीस्यपरमं ब्रह्म योगिगम्यं सनातनं ॥ आगतं शत्रुसंहारकर्तुं पास्वामगोचरं ॥२॥ उक्त्वैवं पुनरूचु
स्तेस्कंदं तं वदतां वरं ॥ किं चकार ततो राजा पुलिंदो दुःखपीडितः ॥३॥ स्कंद उ॰ ॥ ततः शोकातुरो राजा वैश्चि
त्वमुच्चरैर्वृतः ॥ तूर्णं स्वपुरमासाद्य निजदेशाधिपोभवत् ॥४॥ तद्वाक्यं मनसा ध्यायन्स्वशत्रुपुरवासिनः ॥

ज्येष्ठ·
२२

एकादश्याःप्रभावंचस्वदृष्टेरपिगोचरं॥५॥गतेबहुतिथेकालेचिंतामग्नेनृपोत्तमे॥आयुषस्यावशे
षेतुददृशेराज्ञंनिज्ञाश्रमुजे॥६॥सपत्नीकोवनंयातोवानप्रस्थश्चकारसः॥द्वादशाब्देत्वतिक्रांतेप्रछमा
नेतपोधनान्॥७॥कथमेकादशीनामव्रतंपापप्रणाशनं॥दुर्लभंत्रिषुलोकेषुपावनंहरिवल्लभं॥८॥
अहोरास्यमहाश्चर्यंमयादृष्टंनसंशयः॥ततोददर्शराजाचपुण्यान्मुनिगणांस्तदा॥९॥दत्तात्रेयाः
समभ्यागात्दूरेण्पस्याश्रमेशुभे॥सर्वेऋषिगणास्तत्रआगतोदर्शनास्तुकाः॥१०॥दृष्ट्वासुज्ञांस्तवंचक्रुः
सेवांचविविधांतथा॥जगामसोपित्रत्रैवभीतभीतइवस्थितः॥११॥गतेषुऋषिमुख्येषुराजानिकटमा
ययौ॥दंडवत्पतितोभूमौविंध्याचलइवापरः॥१२॥उत्तिष्ठोत्तिष्ठकोसित्वंकिमर्थमिहचागतः॥वदस्व
सकलंमेवैस्वदुःखस्यचकारणं॥१३॥श्रुत्वापिवचनंतस्यनोत्त[illegible]महादुःखितः॥ततउत्थापयामास
स्वकरेणनृपोत्तमं॥१४॥उवाचनृपशार्दूलोज्ञातातस्यातिसौहृदं॥पुलिंदोहंनृपश्रेष्ठविख्यातोजगती
तले॥१५॥जितास्त्वसकलंतातवसुधामंडलंक्षणात्॥ततोहंगर्वमासाद्यगतःप्राचीनबर्हिषं॥१६॥
पीडितंतस्यनगरंविष्णुभक्तस्यभूभुजः॥ग्रामवासीनरःकश्चिदागतोममसन्निधौ॥१७॥उवाचेदंव २२

चोमह्यंअद्यैवास्तिहरेर्दिनं॥अद्यसर्वैश्चक्षमश्चेतिसर्वेव्रतपरायणाः॥१८॥इतितस्यवचःश्रुत्वामदगर्वे
णमोहितः॥अवमस्यवचस्तस्यनजहौतांतथामतिं॥१९॥एवमस्तामितिमानोविष्णुमायाविनिर्मिताः॥
दूताःसहस्रशोयोद्धुमागताश्चबलोत्कटाः॥२०॥तैर्भक्षितंहतंसर्वंसैन्यंसागरसंन्निभं॥प्राणशेषावयं
यातापलाय्यानिजपत्तनं॥२१॥तस्माद्भ्रममाणोहंज्ञातुमेकादशीव्रतं॥त्यक्त्वाराज्यंसुतधनंतापस्वी
वृत्तिमाश्रितः॥२२॥धन्योहंकृतकृत्योहंपूर्वजाःपुण्यशालिनः॥यद्दृष्टंभवतोपादपद्मासुरवरार्चितं॥
२३॥कथमेकादशीनामकार्यंव्रतमनुत्तमं॥समासेनविधिंब्रूहियतस्त्वांशरणंगतः॥२४॥नोचेत्स्य
क्ष्यामिवैप्राणान्नहंशल्यसमानिमान्॥इत्थंवचोवदतितत्रपुलिंदेनोवैदत्तात्रयोपिसकलार्थविद
न्तदानीं॥२५॥राजानमालिंग्यततोभुजाभ्यांव्रतंतथोचेमधुसूदनस्य॥२६॥इतिश्रीभविष्यपुराणेज्ये
ष्ठमाहात्म्येविंशोध्यायः॥२०॥ ॥श्री॥दत्तात्रेयउवाच॥शृणुराजन्प्रवक्ष्यामितद्व्रतंविधिपूर्वकं॥दशम्यां
प्रातरुत्थायकृत्वाशौचविधिंनृप॥१॥कुर्याद्वैदंतकाष्ठैश्चपत्रपर्णैश्चशोधनं॥तेनस्नात्वामहानद्यांपं
चगव्यैःसमंत्रकं॥२॥कृत्वासंध्याह्निकंकर्मशुक्लवासागृहंव्रजेत्॥गृहीत्वोदुंबरंपात्रेवारिपूर्णमुदंमुखः॥

ज्येष्ठ
२३

॥३॥ देशकालं समुच्चार्य प्रणम्यादौ जनार्दनम् ॥ अद्य देवेश ते भक्त्या करिष्ये व्रतमुत्तमं ॥४॥ सिद्धिर्भवतु मे सर्वा
त्वत्प्रसादाद्रमापते ॥ इति संकल्प्य विधिवत् कृत्वा नित्यविधिं नृप ॥५॥ विष्णोश्च प्रतिमां कृत्वा शालिग्राम
शिलां तथा ॥ उपचारैः षोडशभिः पूजयेद्भक्तिपूर्वकं ॥६॥ वर्जयेत्तांबूलं निंदां द्यूतं दुष्टसमागमं ॥ परा
न्नं च पुनर्भुक्तिं अनृतं च प्रपंचं तथा ॥७॥ दशम्यां वर्जयेद्राजन् नेत्रयोरंजनं तथा ॥ हविष्याद्यतिरिक्तं
यत्तत्सर्वं मामिषं स्मृतं ॥८॥ अतः सर्वप्रयत्नेन दशम्यां हविष्यभुक् ॥ रात्रौ जागरणं कृत्वा कथापाठश्र
वणादिभिः ॥९॥ ततोरुणोदये जाते स्नात्वा निर्मलवारिणा ॥ पूजागारे समागम्य नित्यसंध्यादिकं चरेत् ॥१०॥
न किंचिच्चिंतयेच्चित्ते पापं तं नावलोकयेत् ॥ सहस्रनामभिर्विष्णोः पूजनं तुलसीदलैः ॥११॥ तथा सूक्तैः पाव
मानैर्नामभिश्च जनार्दनं ॥ मैथुनं चानृतं स्वापं प्रेक्षणं भाषणं स्त्रियः ॥१२॥ क्रोधं पारुष्यमालापं काष्ठेर्वा दं
तधावनं ॥ नैकादश्यां विशेषेण कर्तव्यं व्रतिभिः सदा ॥१३॥ यामे यामे प्रकर्तव्या पूजा देवस्य चक्रिणः ॥ अहोरा
त्रमिदं कार्यं गीतवादित्रनिःस्वनैः ॥१४॥ ततः प्रभातसमये यावती द्वादशी भवेत् ॥ तावत्सा पारणं कुर्याद्भक्ति
युक्तेन चेतसा ॥१५॥ नो चेतः स्ववशं यस्य पुण्यहा निर्विमिश्रितं ॥ अतः सर्वप्रयत्नेन द्वादश्यां पारणं चरेत् ॥१६॥ २३

कर्तव्यं व्रतिभिर्विप्रैः संपूर्णफलसिद्धये ॥ पारणाहे बहून् विप्रान् शक्तो द्वादशकादपि ॥१७॥ पूजयेदुपचारैश्च भो
जयेत्पायसेन तथा ॥ अन्नैश्च बहुभिः शाकैः पक्वान्नैः खंडपायसैः ॥१८॥ भोजयित्वा द्विजान् श्रेष्ठान् स्वयं भुंजी
त वाग्यतः ॥ परान्नं चामिषं मांसं तैलं स्त्री मधुमाषकं ॥१९॥ मैथुनं [illegible]सुरां हिंसां कांस्यं ताम्बूलभक्षणं ॥ द्वादश्यां
च पुनर्भुक्तिं द्वादशान् वर्जयेत्सदा ॥२०॥ दिने स्त्रीभिरिदं साध्यं व्रतानामुत्तमं व्रतं ॥२१॥ अन्नं तु सर्वथा वर्ज्यं
भक्षणान्नरकं व्रजेत् ॥ शाकं जलं च लवणं वान्हिना पाचितं च यत् ॥२२॥ तदन्नं नैव भुंजीत भुक्ते चांद्रायणं
चरेत् ॥ धान्यं भक्षंति ये मोहाद्धंत प्राप्ते हरिवासरे ॥२३॥ चांद्रायणशतं कृत्वा मुच्यते पातकाद्ध्रुवं ॥ इति ते क
थितं राजन् मया पृष्टं त्वया मम ॥२४॥ पुलिंद उ० ॥ त्वया यत्कथितं तात रहस्यं परमाद्भुतं ॥ अवाप्तं तु मया कोहं
व्रतमेतन्महत्फलं ॥२५॥ अतस्त्वं कृपया ब्रूहि सारात्सारं यथोदितं ॥ सर्वेषामेव कर्माणां सारमासीन्न संश
यः ॥२६॥ दत्तात्रेय उ० ॥ कृपया मे महाबाहो रहस्यं परमाद्भुतं ॥ यस्यानुष्ठानमात्रेण सकलं सफलं भवे
त् ॥२७॥ शुक्लस्यैकादशी शक्त्या कुरुष्व जलवर्जिता ॥ तस्यानुष्ठानमात्रेण पूर्णं भवति निश्चितं ॥२८॥ पुलि
द उ० ॥ शुक्लस्यैकादशी विप्र कथं सा जलवर्जिता ॥ दत्त उ० ॥ प्राचीनबर्हिषः सर्वे स्वकालं सलिलेन तथा ॥ ए

कादशी द्वादशी च लनातै र्जलवर्जिता ॥ निर्जलेति च सा ख्याता स्मरणात्पापनाशिनी ॥२०॥ कृतो यातेपु
लिंदोपि चकार विधिपूर्वकं ॥ तस्यानुष्ठानमात्रेण पुण्यस्या निशापेन च ॥२१॥ प्रल्हादो नाम विख्यातो हिरण्य
कशिपोः शिशुः ॥ तेनापीदं व्रतं कृत्वा जातो नारायणप्रियः ॥२२॥ व्यास उ० ॥ एतत्ते कथितं भीम इतिहासं पुरा
तनं ॥ एकादशीद्वादशीचार्कं पुनः श्रोतुमिच्छसि ॥२३॥ भीम उ० ॥ नष्टो मोहो स्मृतिर्लब्धा त्वत्प्रसादात्पिता
मह ॥ सर्वपापविनिर्मुक्तो प्रसादाच्चक्रपाणिनः ॥२४॥ इति श्रीभविष्यपुराणे ज्येष्ठमाहात्म्ये एकविंशोध्या
यः ॥२१॥ ॥श्री॥ स्कंद उ० ॥ अस्यैव शुक्लपक्षस्य त्रयोदश्यां दिनतः शुभे ॥ पौर्णिमांतं व्रतं कार्यं स्त्रीभिः सौ
भाग्यसिद्धये ॥१॥ तत्रैवोपोषणं कार्यं पारणा प्रतिपत्तिथौ ॥ ऋषय उ० ॥ विधिं ब्रूहि महासेन व्रतस्यास्य
फलं तथा ॥२॥ स्कंद उ० ॥ ज्येष्ठे मासे तु संप्राप्ते पौर्णिमायां पतिव्रता ॥ शुचिर्भूत्वा वटं पूज्य जलैरमृतसंनि
भैः ॥३॥ सूत्रेण वेष्टयेद्भक्त्या गंधपुष्पाक्षतैः शुभैः ॥ नमो वैवस्वतायेति भ्रमयंति प्रदक्षिणं ॥४॥ रात्रौ
कुर्वीत नक्तं च ह्यब्दमेकं समाहिता ॥ तथैव वटवृक्षस्य पक्षे पक्षे प्रपूजनं ॥५॥ संप्राप्ते च पुनर्ज्येष्ठे लघु
भुक् द्वादशीं नयेत् ॥ दंतानां धावनं कृत्वा नियमं कारयेत्तदा ॥६॥ त्रिरात्रं लंघयिष्यामि चतुर्थे दिवसे व्रती ॥

चंद्रायार्घ्यं प्रदत्वा च पूजयित्वा व्रतं तदा ॥७॥ मिष्टान्नानि यथाशक्त्या भोजयित्वा द्विजोत्तमान् ॥ भोक्ष्येहं च
जगद्धात्रि निर्विघ्नं कुरु मे शुभे ॥८॥ ततो वंशमये पात्रे सप्तधान्यभृतं न्यसेत् ॥ वस्त्रयुग्मोपरि संस्थाप्य प्र
तिमा वस्त्रसंयुतां ॥९॥ ब्रह्मणा सह सावित्री सौवर्णीं प्रतिमां शुभां ॥ तथैव यमराजस्य कारयेत्सुनयेन्तथा
॥१०॥ न्यग्रोधस्य शुभे मूले त्रिदिनं तत्रावसेत् ॥ पूर्णायां प्रातरुत्थाय स्नात्वा सम्यक् सर्षपैः शुभं ॥११॥ सत्यवं
तं च सावित्रीं कृत्वा स्वर्णमयीं तथा ॥ पर्यंके राजते स्थाप्य काह्यभारं तथावृतं ॥१२॥ तथैव यममुद्दिश्य रपदीप
दानं प्रचक्षते ॥ इहा नियममुद्दिश्य भक्त्या दीपं पतिव्रता ॥१३॥ सा भर्तृसहिता साध्वी समस्तसुखभोगिनी
॥ नारी या विधवा वापि अपुत्रा वा कुमारिका ॥१४॥ सभर्तृका सपुत्रा वा कार्यं व्रतमिदं शुभं ॥ ॐकारपूर्वके दे
वी वीणपुस्तकधारिणी ॥१५॥ वेदमातर्नमस्तेस्तु अवैधव्यं प्रयच्छ मे ॥ पतिव्रते महाभागे वन्हिजाये शुचि
स्मिते ॥ दृढव्रते दृढमते भर्तुश्च प्रियवादिनी ॥१६॥ अवैधव्यं च सौभाग्यं देहि त्वं मम सुव्रते ॥ पुत्रान्पौत्रां
श्च सौख्यं च गृहाणार्घ्यं नमोस्तु ते ॥१७॥ त्वयावृतं जगत्सर्वं सदेवासुरमानुषं ॥ सत्यव्रतधरो देव ब्रह्म
रूप नमोस्तु ते ॥ त्वं कर्मसाक्षि लोकानां शुभाशुभविवेककृत् ॥ वैवस्वत गृहाणार्घ्यं धर्मराज नमोस्तु ते ॥

ज्येष्ठ
२५

॥१९॥ धर्मराजनमस्तेस्तु साक्षिभूतस्तु जंतुषु ॥ धर्मरूपगृहाणार्घ्यं मवैधव्यं प्रयछ मे ॥२०॥ एवं संवत्स
रं कार्यं अशक्तो मासमात्रकं ॥ तदशक्तौ त्रिरात्रं वा पूर्णिमायां विशेषतः ॥२१॥ उपोष्यैव व्रतं कुर्याच्छु
चिष्मान् मासमात्रतः ॥ प्रातःस्नानं मया कृत्वा ज्येष्ठमासे कुलस्त्रियः ॥२२॥ तासामवश्यं दौर्भाग्यं हृजे
पित्रमह ब्रूते ॥ अश्रुचेश्र्ययथाकर्मस्वफलं निष्फलं भवेत् ॥२३॥ प्रातःस्नानविहीनानां ज्येष्ठे कर्मवृतं
नृणां ॥ एवं सर्वं समाख्यातं सावित्र्यास्त्रिदिनव्रतं ॥२४॥ माहात्म्यं ज्येष्ठमासस्य संक्षेपेण मयोदितं ॥
अग्रे सर्वं वदिष्यामि सुषमङ्कृत्ता सुतोषितः ॥२५॥ ज्येष्ठे ज्येष्ठायुता चैव स्यात् छत्रोपानहदानतः ॥ न
राधिपत्वमाप्नोति नियमेन नरा भुवि ॥२६॥ कुर्यापापहरी पुण्यां महाश्चर्यकरी ह्रियत् ॥२७॥ इतिश्री
भविष्यपुराणे ज्येष्ठमाहात्म्ये द्वाविंशोध्यायः ॥२२॥ ॥श्री॥ व्यास उ॥ शृणु राजन् व्रतं स्त्रीणां म
हाभाग्यं युधिष्ठिर ॥ सर्वं फलं यथा प्राप्तं सावित्र्या राजकन्यया ॥१॥ आसीन्मद्रेषु धर्मात्मा राजा प
रमधार्मिकः ॥ ब्रह्मण्यश्च शरण्यश्च सत्यसंधो जितेंद्रियः ॥२॥ यज्वा दानपतिर्नित्यं पौरजानप
दप्रियः ॥ पार्थिवोश्वपतिर्नामा सर्वभूतहिते रतः ॥३॥ क्षमावान्नीतिसंपन्नो सत्यवाक् च जितेंद्रियः ॥

अतिक्रांते वयसि संतापं जग्मिवान्नृपः ॥४॥ अनपत्योस्पादनार्थं पुत्रं व्रतसमास्थितः ॥ कालेपरिमि
ताहारो ब्रह्मचारी जितेंद्रियः ॥५॥ हुत्वा शतसहस्रं च सावित्र्या राजसत्तमः ॥ षष्ठे षष्ठे तदा काले
बभूव मितभोजनः ॥६॥ एतेनातिनियमेनापि वर्षाणां च दशौ [illegible] ॥ पूर्णे द्वादशके वर्षे सावित्री तुष्टिमभ्य
गात् ॥७॥ रूपिणी तु तदा राजन् दर्शयामास तं नृपं ॥ अग्निहोत्रात्समुत्थाय हर्षेण महता तदा ॥ नातुवा
च चैनं वरदा वचनं पार्थिवं तदा ॥ सावित्र्यु॥ ब्रह्मचर्येण शुद्धेन नियमेन दमेन च ॥९॥ सर्वात्मना च भ
क्त्या च तुष्टास्मि तव पार्थिव ॥ वरं वरय भूपाल मद्रराज यथेप्सितं ॥१०॥ न प्रमश्चैव धर्मेषु कर्तव्यश्च
त्वया नृप ॥ अश्वपतिरु॥ अपत्यार्थं समारंभः कृतो धर्मेप्सया मया ॥११॥ पुत्र एव हि मे देवि भवे
श्चे कुलभावनः ॥ तुष्टास्मि यदि मे देवि कामये हं घणे सुतं ॥१२॥ न संतानात्परो धर्म इत्याहुर्मां द्विजा
तयः ॥ सावित्र्यु॥ पूर्वमेव मया राजन्नभिप्रायमिमं तव ॥१३॥ ज्ञात्वैव प्रेषितामास भगवान्मां पिता
महः ॥ प्रसादश्च वरं तस्मै कन्या चैका भविष्यति ॥१४॥ कन्या तेजस्विनी सौम्य क्षिप्रमेव भविष्यति
॥ उत्तरं च न ते किंचिद् व्याहर्तव्यं कथंचन ॥१५॥ पितामहनिसर्गेण तुष्टास्ते तद्ब्रवीमि ते ॥ सतथेति

ज्येष्ठ॰
२८

च विज्ञाय सावित्र्या वचनं नृप॥१६॥ प्रसादयामास पुनः पुत्री ते वै भविष्यति॥ अंतर्हितायां सा-
वित्र्यां जगाम स्वगृहं नृप॥१७॥ स राज्यं प्राप्य सुप्रीतः प्रजा धर्मेण पालयन्॥ कस्मिंश्चित्तु गते
काले स राजा नियतव्रतः॥१८॥ ज्येष्ठायां धर्मचारिण्यां महिष्यां गर्भमादधे॥ राजपुत्र्यां ततो गर्भं
ह्यंतर्वत्नी नृपांगना॥१९॥ व्यवर्द्धत शुक्लपक्षे तारापतिरिवांबरे॥ प्राप्ते काले तु सुषुवे कन्यां राजी-
वलोचनां॥२०॥ जातकर्म च कन्यायाश्चक्रे नृपतिसत्तमः॥ सावित्र्याः प्रीतये दत्ता दानानि विविधा-
नि च॥२१॥ सावित्रीत्येव नामास्याश्चक्रुर्विप्रास्तथा पिता॥ सावित्री च पितुर्गृहे व्यवर्द्धत नृपात्म-
जा॥२२॥ कालेनाथ च सा कन्या यौवनस्था बभूव ह॥ ततः सुतां स्वां सुश्रोणीं सावित्रीं प्रतिमां भुवि॥
२३॥ प्राप्तेयं देवकन्येव दृष्ट्वा तां मेनिरे जनाः॥ तां तु पद्मपलाशाक्षीं ज्वलंतीमिव तेजसा॥ न कश्चि-
द्वरयामास तेजसा प्रतिबाधितः॥ अथोषसि शिरःस्नाता तां दे[illegible]मभिगम्य सा॥२४॥ हुत्वाग्निं विधिव-
द्विप्रान्पूजयामास पर्वणि॥ ततः सुमनसा चैषा प्रतिपूज्य महात्मनः॥२५॥ पितुः सकाशमगमत् देवी
श्रीरिव रूपिणी॥ साभिवाद्य पितुः पादौ शेषं पूर्वं निवेद्य च॥२६॥ कृतांजलिर्वरारोहा नृपतेः पार्श्वतः स्थि-
२८

ता॥ यौवनस्थां ततो दृष्ट्वा स्वसुतां देवरूपिणीं॥२८॥ अपृच्छमाना च वरैर्नृपतिर्दुःखितोऽभवत्॥ राजो-
वाच॥ पुत्रि प्रदानकालस्ते त्वां न कश्चिद्वृणोति च॥२९॥ स्वयमन्विष्य भर्तारं गुणैः सदृशमात्मनः॥
प्रार्थितः पुरुषो यश्च स निवेद्यस्त्वया मम॥३०॥ विमृश्याभिमतं तं च यस्मात्तं च यथेप्ससि॥ श्रुतं हि ध-
र्मशास्त्रेषु पठ्यमानं द्विजातिभिः॥३१॥ तथा त्वमपि शृण्वैव वचनं मे हितावहं॥ अप्रदाता पिता वा-
च्यश्चानुपन्ना सुतापि हि॥३२॥ मृते भर्तरि पुत्रैश्च रक्षितव्या स्वमातरः॥ इदमेव वचः श्रुत्वा भर्तुरन्वेषणं
चरेत्॥३३॥ देवतानां वचस्तथ्यं भवेच्चैव तथा कुरु॥ एवमुक्त्वा दुहितरं तथा वृद्धांश्च मंत्रिणः॥३४॥ व्या-
दिदेशानुयातां तां गम्यतामिति चोदयत्॥ साभिवाद्य पितुः पादौ व्रीडितेव तपस्विनी॥३५॥ पितुर्वचन-
माज्ञाय निर्जगामाविचारितं॥ सा हैमरथमास्थाय वीरैश्च सचिवैर्वृता॥३६॥ तपोवनानि रम्याणि
राजर्षीणां जगाम ह॥ मान्यानां तत्र वृद्धानां कुर्यात्सा दाभिवंदनं॥३७॥ वनानि क्रमशस्तानि पुण्या-
न्येवाभिगच्छति॥ एवं सर्वेषु तीर्थेषु भ्रमती वनृपात्मजा॥३८॥ कुर्वंती द्विजमुख्यानां तं तं देशं जगा-
म ह॥३९॥ इति श्रीभविष्यपुराणे ज्येष्ठमाहात्म्ये त्रयोविंशोऽध्यायः॥२३॥ ॥ॐ॥ स्कंद उवाच॥

उपेष्ठ
२७

अथमद्राधिपोराजानारदेनसमागतः॥ उपविष्टःसभामध्येकथायोगेनभारत॥१॥ ततोनिर्गम्य
तीर्थाणिसर्वाण्येवाश्रमानपि॥ आजगामपुनर्वेश्मसावित्रीमंत्रिभिःसह॥२॥ नारदेनसमासीनं
दृष्ट्वासापितरंशुभा॥ उभयोःपादयोश्चैवकृत्वापादाभिवंदनं॥३॥ नारदउ०॥ क्वगताभवतःसुता
कुतश्चैवागतानृप॥ किमर्थंप्रवर्त्तीभर्तुर्नचैनांसंप्रयच्छसि॥४॥ अ०॥ कार्येणैषाह्यनेनैवप्रेषिताचैवह्या
गता॥ नारदोक्तंवचःश्रुत्वासावित्रीलज्जिताभृशं॥५॥ पित्रासंचोदिताबालाविस्तरेणब्रवीद्व
चः॥ दैवतस्येववचनंप्रतिपन्नमिदंखलु॥६॥ सावित्र्यु०॥ आसीच्छाल्वेषुदेशेषुक्षत्रियःपृथिवी
पतिः॥ द्युमत्सेनइतिख्यातोदैवादंधोबभूवह॥७॥ विनष्टचक्षुषस्तस्यबालःपुत्रश्चधीमतः॥
सामंतेनहृतंराज्यंतदेशात्पूर्ववैरिणा॥८॥ सबालभार्ययासार्द्धंप्रस्थितश्चततोवनं॥ महार
ण्यंगतश्चापितपस्तेपेमहाव्रतः॥९॥ तस्यपुत्रःपुराजातःप्रवृद्धश्चतपोवने॥ सत्यवाननुरूपसंप
न्नोमनसावमयावृतः॥१०॥ तच्छ्रुत्वानारदःप्राहराजानंप्रीतिपूर्वकं॥ अहोबतमहत्कष्टंसावित्र्या
नृपतेकृतं॥११॥ अज्ञानेववृतोभर्त्तासत्यवान्गुणसंमतः॥ सत्यवाक्सत्यसंपन्नोसत्यधर्मप २७

रायणः॥१२॥ ततोस्यब्राह्मणाश्चक्रुःसत्यवानितिनामच॥ विवस्वानिवतेजस्वीबृहस्पतिसमोमतौ॥
१३॥ महेंद्रइवशूरश्चवसुधेवक्षमायुतः॥१४॥ बलिराजासमोदाताब्राह्मण्यश्चापिवीर्यवान्॥ रंति
देवइवोदारोआत्रेयप्रियदर्शनः॥१५॥ अंबरीषइवशांसाहरिश्चंद्रइवक्षमः॥ ब्राह्मण्यःसत्यवा
दीचतथावशीशिरोपमः॥१६॥ ययातिरिवयोदारःसोमवत्प्रियदर्शनः॥ रूपेणाप्रतिमोकामोपि
तेवप्रतीपालकः॥१७॥ दांतोमृदुःसदाशूरोसत्यवाक्चजितेंद्रियः॥ संक्षेपतोमयोक्तोयंगुणैश्चबहु
भिर्युतः॥१८॥ अश्वपतिरु०॥ गुणैरुपेतंसर्वैस्तंभगवन्प्रब्रवीषिमे॥ दोषानपिचमेब्रूहियदिसं
तिहिकेचनापि॥१९॥ नारदउ०॥ एकएवास्यदोषोस्तिगुणानाक्रम्यातिष्ठति॥२०॥ सचदोषःप्रयत्नेन
नशक्यश्चनिवर्तितुं॥ एकैवदोषोनान्योस्तिसोद्यप्रभृतिसत्यवान्॥२१॥ एकसंवत्सरेणापिदेहत्यागं
करिष्यति॥ राजोवाच॥ एहिसावित्रिगच्छत्वमन्यंवरयशोभने॥ तस्मिन्दोषोभवेनैकोगुणाना
क्रम्यवर्त्तते॥२२॥ यथामांभगवानाहनारदोदेवदर्शनः॥ सचसंवत्सरेणैवदेहत्यागंकरिष्यति॥
॥२३॥ सावित्र्यु०॥ सकृद्दंतिराजानोसकृज्जल्पंतिपंडिताः॥ सकृत्कन्याप्रदीयंतेत्रीण्येतानि

ज्येष्ठ॰
२९

सकृत्सकृत्॥२४॥ दीर्घायुरथवाल्पायुः सगुणो निर्गुणो पि वा॥ सकृद्वृतो मया भर्त्ता द्वितीयं न वृ
णोम्यहं॥२५॥ मनसा निश्चयं कृत्वा ततो वाचाभिधीयते॥ कर्मणा क्रियते पश्चात्प्रमाणं मन
सस्ततः॥ नारद उ०॥ स्थिरा बुद्धिर्नरश्रेष्ठ सावित्र्या दुहितुस्तव॥ नैषा वारयितुं शक्या धर्मादस्मा
त्कथंचन॥२७॥ यस्मिन्नेव पुरुषे यस्या मतिर्भवति निश्चिता॥ स एव रोचते राजन्सावित्र्या दुहितु
स्तव॥२८॥ राजोवाच॥ विचार्यैव मया त्वोक्तं तथ्यं भगवतो वचः॥ करिष्यति तदेवेयं कन्या च मन
सेप्सितं॥२९॥ नारद उ०॥ अविघ्नमस्तु सावित्र्याः प्रदानं दुहितुस्तव॥ एवमुक्त्वा समुत्थाय नारदः
त्रिदिवं गतः॥३०॥ राजापि दुहितुः कर्म वैवाह्यमकरोत्तदा॥३१॥ इति श्रीभविष्यपुराणे ज्येष्ठमाहा
त्म्ये चतुर्विंशोध्यायः॥२४॥ ॥छ॥ स्कंद उ०॥ ततो वृद्धान्द्विजान्सर्वानृत्विग्भ्यश्च सभासदान्॥
समाहूय पतिर्यो पुण्ये प्रययौ कन्यया सह॥१॥ महारण्यं पसमागम्य द्युमत्सेनाश्रमं नृपः॥ तत्राप
श्यन्महात्मानं शालवृक्षसमाश्रितं॥२॥ कुट्यां वृद्धं समासीनं चक्षुर्हीनेन्नृपं तदा॥ स च राजा स
राजर्षेः कृत्वा पूजां यथाविधिः॥३॥ वाचा सुनियतो भूत्वा कृत्वा त्वात्मनिवेदनं॥ तस्यार्घमासनं २९

चैवं दत्वा वचनमब्रवीत्॥४॥ किमागमननिमित्तेवमंधो राजानमब्रवीत्॥ तस्य सर्वमभिप्रायमि
ति कर्त्तव्यतां च सः॥५॥ सत्यवंतं समुद्दिश्यप सर्वमेव निवेदितं॥ सावित्री नाम राजर्षे कन्येयं मम
शोभना॥६॥ तां स्वधर्मेण धर्मज्ञ स्नुषार्थं संगृहाण मे॥ द्युमत्सेन उ०॥ च्युतोस्मि राज्याद्वनवा
समाश्रिताश्राम धर्मनियतास्तपस्विनः॥ कथं त्वनर्हा वनवासमाश्रमे सहिष्यसे क्लेशमिति तु सु
तातव॥७॥ अश्वपतिरु०॥ आशां नार्हसि मे हंतुं सोहृदं प्रणतस्य च॥ विचिंत्य चागतं प्रेम्णा प्रत्या
ख्यातुं नत्वार्हसि॥८॥ सुरूपो विपुलश्चैव पुत्रस्तव महान्गुणः॥ स्नुषार्थमानितां कन्यां भार्यार्थे भव
तः सुतः॥९॥ द्युमत्सेन उ०॥ पूर्वमेवाऽभिलषितो संबंधो मे त्वया सह॥ भ्रष्टराज्यस्त्वमिति च अतएव
विचारितं॥१०॥ ततः सर्वान्द्विजांश्चैव विचार्याश्रमवासिनः॥ यथाविधि समुद्वाहं कारयामास तु
र्नृपौ॥११॥ दत्वा चाश्वपतिः कन्यां यथार्हं सपरिच्छदान्॥ ययौ स्वकीयभुवनं मुक्तः परमया मुदा॥
१२॥ स सत्यवानपि भार्यां तां लब्ध्वा सर्वगुणान्वितां॥ मुमुदे सापि तं लब्ध्वा भर्त्तारं मनसेप्सितं॥१३॥
गते पितरि सर्वाणि न्यस्त्वान्याभरणानि च॥ जगृहे वल्कलान्येव वस्त्रं काषायमेव च॥१४॥ परिचर्या

ज्येष्ठ
२९

गुणैश्चैव प्रश्रयेण दमेन च ॥ सर्वाःकामक्रियानित्यं सर्वेषां तुष्टिमावहत् ॥ १५ ॥ एवं तत्राश्रमे तेषां सदा
निवसतां सतां ॥ काले काले च शुश्रूषां सर्वेषां चकरोति सा ॥ १६ ॥ सावित्री सेवया नित्यं सर्वेषां तुष्टिमा
वहत् ॥ नान्यत्र याति सावित्री तिष्ठंती च दिवानिशं ॥ १७ ॥ नारदेन यदुक्तं तद्वाक्यं मनसि चिंतयत् ॥
१८ ॥ इति श्रीभविष्यपुराणे ज्येष्ठमाहात्म्ये पंचविंशोध्यायः ॥ २५ ॥ ॥ श्री ॥ स्कंद उ० ॥ ततः काले बहु
तिथे व्यतिक्रांते कदाचन ॥ मृत्युकालं सत्यवतो ज्ञात्वा चैव तपोधना ॥ १ ॥ प्राप्तकाले च कर्तव्यं यत्र सत्य
वति स्थिते ॥ गणयित्वा च सा विद्या दिवसे दिवसं ततः ॥ २ ॥ यदुक्तं नारदेनैव कुर्वती हृदि निश्चयं ॥ व्र
तं त्रिरात्रमुद्दिश्य दिवारात्रं स्थिराभवत् ॥ ३ ॥ चतुर्थेऽहनि कर्तव्यमिति संचिंत्य भामिनी ॥ नियमं परमं
चक्रे उपवासं दिनत्रयं ॥ ४ ॥ दृष्ट्वा तस्याश्च नियमं दुःखाद्बाष्पान्वितो नृपः ॥ उत्थाय वाक्यं सावित्री
मब्रवीत् दुःखान्वितः ॥ ५ ॥ द्युमत्सेन उ० ॥ अतितीव्रोयमारंभस्त्वया प्राप्तो नृपात्मजे ॥ दिनत्रयं
त्वया भद्रे तपः परम दुश्चरं ॥ किमर्थं क्रियते तन्ममाख्याहि शुभानने ॥ सावित्र्युवाच ॥ ज्ञात्वा
तद्दिवसं देव भर्तुर्निधनकारणं ॥ ७ ॥ अतो नतस्य नियमं त्रिदिनस्य मयाकृतं ॥ अस्मिन् दिने च म २९

र्त्यं तदा सत्यवतो मुने ॥ ८ ॥ स कुठारं गृहीत्वा च प्रययौ वनमादरात् ॥ काष्ठमानयितुं गच्छन् सा
वित्री वाक्यमब्रवीत् ॥ ९ ॥ न गंतव्यं त्वया स्वामिन् मद्वाक्येन च मानद ॥ अथवा गम्यते साधो मया सह व
नं व्रज ॥ १० ॥ संवत्सरं व्रतं पूर्णमाश्रमेस्मिन्मम प्रभो ॥ तद्वनं द्रष्टुमिच्छामि प्रसादं कुरु मे प्रियं ॥ ११ ॥ प
तिरु० ॥ नाहं स्वतंत्रः सुश्रोणि पृच्छ स्वपितरौ मम ॥ ताभ्यां प्रस्थापिता गच्छ मया सह शुचिस्मिते ॥ १२ ॥
एवमुक्ता तदा तेन भर्त्रा सा कमलेक्षणा ॥ श्वश्रूश्वसुरयोः पादौ अभिवाद्य तदाब्रवीत् ॥ १३ ॥ तद्वनं द्र
ष्टुमिच्छामि अद्य मां वै प्रदीयतां ॥ उवाच वचनं साध्वी वरमेकं प्रयच्छथः ॥ १४ ॥ सावित्र्यु० ॥ भर्त्रा सह
वनं गंतुमेनत्वरयते मनः ॥ तस्यास्तद्वचनं श्रुत्वा द्युमत्सेनोऽब्रवीदिदं ॥ १५ ॥ व्रतं कृतं त्वया भद्रे पारणं
कुरु सुव्रते ॥ पारणांते ततो भीरु वनं गंतुं त्वमर्हसि ॥ १६ ॥ सावित्र्यु० ॥ नियमश्च कृतोऽस्माभि रात्रौ
चंद्रोदये सति ॥ तदा मया प्रकर्तव्यं भोजनं तात मे शृणु ॥ १७ ॥ वनदर्शनकामोस्ति भर्त्रा सह ममाद्य
वै ॥ न मे तत्र भवेत् ग्लानि भर्त्रा सह नराधिप ॥ १८ ॥ इति श्रुत्वा तदा राजा द्युमत्सेनो महीपतिः ॥
यत्तेभिलषितं पुत्री तत्कुरुष्व सुमध्यमे ॥ १९ ॥ नमस्कृत्य तु सावित्री श्वश्रूश्वसुरयोरपि ॥ सहिता

पतिनासाध्वीवनंयातिशनैःशनैः॥२०॥ विलोकयंतिभर्त्तारं तंचकालंयशस्विनी॥ वनंचफुलितंदृष्ट्वा
पुष्पितंकुसुमसंकुलं॥२१॥ द्रुमाणांचैवपक्षीणां मृगाणांचैवभामिनी॥ पश्यंतिमृगयूथानिहृद
येनप्रवेपति॥२२॥ तत्रागत्वाससुवानवैफलान्यादायसत्वरः॥ काष्ठानिचसमादायबबंधेभारकं
तदा॥२३॥ कठिनंपूरयामास तुसावृक्षावलोकनं॥ वटवृक्षसमाश्रित्य उपविष्टामहासती॥२४॥
काष्ठानुपाटयतस्तस्यजाताशिरसिवेदना॥ ग्लानिश्चमहतीजाता गात्राणांवेपथुस्तदा॥२५॥ आ
गत्यवृक्षसामीप्यंसावित्रीमिदमब्रवीत्॥ ग्लानिश्चमहतीजाता शिरस्याक्षिवेदना॥२६॥ कंटके
विध्यतेभद्रे शिरोमेशूलसंनिभं॥ उत्संगेतवसुश्रोणि सुप्तिमिच्छामिसुव्रते॥२७॥ ज्ञात्वासाचैवविशा
लाक्षीतस्यमृत्युंमनस्विनी॥ प्राप्तकालंमन्यमाना तास्मिन्नेववनेतदा॥२८॥ तुसाचतच्छिरोद्धंके
निधायगतजीविकं॥ तावत्तत्रसमागत्यनुपुरुषःकृष्णपिंगलः॥२९॥ इतिश्रीभविष्यपुराणेज्येष्ठ
माहात्म्येषड्विंशोध्यायः॥२६॥ ॥श्री॥ ऋषयऊचुः॥ किमुकारितदासाध्वी एकाकीवनमाश्रि
ता॥ दुःखशोकभयाक्रांता असहायातपस्विनी॥१॥ स्कंदउ॥ सागतासुधर्मज्ञोआगतः ३९

स्वयमेवच॥ जाज्वल्यमानवपुषादृश्योयमचभामिनी॥२॥ उवाचवचनंबाला कस्त्वंलोकक्षयंकरः॥
यमउ॥ क्षीणायुस्तुवरारोहे भर्तातवमनस्विनी॥३॥ दुःसहंदेवितेतेजो दूताःसोढुंनशक्नु
ते॥ इतिमित्तुमहाभागे स्वयमागमनंमम॥४॥ इत्युक्त्वातांवरारोहां तस्यदेहान्महात्मनः॥ अंगु
ष्ठमात्रंपुरुषंबध्वापाशेनसुदृढं॥५॥ चिचकर्षततोवेगाद्गृहीत्वाप्रास्थितंपुरीं॥ सावित्रीतुततःपश्चा
दनुयातिस्मतंपतिं॥६॥ यमउ॥ निवर्त्तस्वमहाभागेसंतुदुःखमुपागता॥ गत्वास्वभुवनंशीघ्रंकु
रुष्वश्चौर्ध्वदैहिकं॥७॥ एवमुक्त्वातुसातेन प्रत्युवाचयमंतदा॥ सावि॰उ॰॥ तथामेनचदुःखानि
सकाशेतवमानद॥८॥ विशेषतस्तुश्वश्रोस्तिनमेग्लानिसुरेश्वर॥ धर्मेणत्वंपालयसेधर्मेणत्वं
विवर्धसे॥९॥ धर्मिणांदर्शनंनैवसुलभंचकदाचन॥ धर्मस्वरूपस्त्वमसिइतिवेदविदोविदुः॥१०॥ स्कंदउ॰
संतुष्टस्तेनवाक्येन धर्मराजोयमस्तदा॥ वराणामीश्वरोनानावरंतस्यैददेशुभं॥११॥ तस्मा दूरा
श्वसाववृत्रेनेत्रेश्वश्रुरयोस्तदा॥ राज्यप्राप्तिंपितुःपुत्रान् शतंचैवात्मनस्तथा॥१२॥ जीवितंचतथाभ
र्तुर्जीवनंचतदाज्ञया॥ प्रदक्षिणंयमंकृत्वाधर्मराजंपतिव्रता॥१३॥ नत्वैवमुक्त्वाधर्मराजोजगामचस्व

ज्येष्ठ०
३१

मालयं ॥ सागम्य वटसामीप्यं कृत्वोत्संगे शिरस्तदा ॥१४॥ प्रबुद्धः सत्यवान्वाक्यं सावित्रीमिदमब्र
वीत् ॥ मयास्वप्नं वरारोहे दृष्टं त्वेयं वरानने ॥१५॥ तत्सर्वं कथितं तस्यै यद्दृष्टं सर्वमेव च ॥ तथा च क
थितं सर्वं संवादरूभपोरपि ॥१६॥ अस्तं गते ततः सूर्ये द्युमत्सेनो महीपतिः ॥ पुत्रस्यागमनं कांक्ष
न्नितस्ततश्च धावति ॥१७॥ आश्रमादाश्रमं गच्छन् पुत्रदर्शनकांक्षया ॥ अंधयो रवयोर्यष्टिः क्व ग
ताद्य विनावयोः ॥१८॥ एवं सावीविधाक्रोशान्सपत्नीको महीपतिः ॥ चकार दुःखं तपसः सन् पुत्रपुत्रे
ति वा सकृत् ॥१९॥ अकस्माद्देवराजोंऽथो लब्ध्वा चक्षुर्महेश्वरात् ॥ तं दृष्ट्वा परमाश्चर्यं चक्षुप्राप्तिं
द्विजोत्तमाः ॥२०॥ तं च पूर्ववत्तदा दृष्ट्वा याचयम्चुश्च तापसाः ॥ चक्षुप्राप्त्या महाराज पुत्रश्चैवागामि
ष्यति ॥२१॥ पुत्रेण च समं योगं प्राप्स्यसे नृपसत्तम ॥ स्कंद उ० ॥ यावदेवं वदंति ते तापसा द्विजसत्त
माः ॥२२॥ सावित्र्या सहितः प्राप्तः सत्यवान् द्विजसत्तमाः ॥ नमस्कृत्य द्विजान्सर्वान्मातरं पितरं
ततः ॥२३॥ सावित्र्यपि ततो ब्रह्मन्ववंदे चरणाविति ॥ वृद्धस्य चक्षुषः प्राप्तिश्च सुरस्य वरानना ॥
२५॥ सावित्र्यु० ॥ न जानामि मुनिश्रेष्ठा चक्षुषः प्राप्तिकारणं ॥ चिरं सुप्तस्तु मे भर्त्ता तेन कालव्यतिक्र ३१

मः ॥२६॥ सत्यवानु० ॥ अस्याः प्रभावात्संजातं यद्दृष्टं तत्र कारणं ॥ नास्तु वै विद्यते विप्राः सावित्र्यास्त
पसः फलं ॥२७॥ व्रतस्यैव तु माहात्म्यात् दृष्टमेतन्मयाधुना ॥ स्कंद उ० ॥ एवं ब्रुवदस्तस्य तदा सत्यवतः प्र
भोः ॥२८॥ पौराः समागतास्तत्र त्रस्याचख्युर्नृपतिं इतः ॥ येन राज्यं बलं कोशं हृतं क्रूरेण मंत्रिणा ॥
२९॥ आमात्येन हतः सोपि इति पौराः समागताः ॥ पौरा ऊचुः ॥ उत्तिष्ठ राजशार्दूल स्वं राज्यं पालय प्र
भो ॥३०॥ अभिषिंच स्वराज्ये द्रस्तुतं मंत्री पुरोहितैः ॥ स्कंद उ० ॥ स गत्वा राजशार्दूलः स्वपुरं जनसं
कुलं ॥३१॥ पितृपैतामहं राज्यं संप्राप्तं च महासनः ॥ सावित्री सत्यवांश्चैव परां मुदमवापह ॥३२॥ ज
नयामास पुत्राणां शतं वै बाहुशालिनं ॥ व्रतस्यैव तु माहात्म्यात् तस्याः पितुरजापत ॥३३॥ पुत्राणां
च शतं राजा प्रसादाच्च यमस्य च ॥ एतत्ते कथितं सर्वं व्रतमाहात्म्यमुत्तमं ॥३४॥ दीर्घायुर्जीवितो भ
र्त्ता व्रतस्यास्य प्रभावतः ॥ कर्त्तव्यं सर्वनारीभिरवैधव्यफलप्रदं ॥३५॥ इति श्री भविष्यपुराणे ज्येष्ठमा
हात्म्ये सप्ताविंशोध्यायः ॥२७॥ ॥श्री॥ स्कंद उ० ॥ पुरावंगारको नाम ब्राह्मणो लोकविश्रुतः ॥ वेद
शास्त्रपुराणज्ञो धनी च बहुबांधवः ॥१॥ देवसेनेति विख्याता भार्या रूपगुणान्विता ॥ धर्मपत्न्या

ज्ये०
३२

तयासार्द्धंस्वसुखंचिरमन्वभूत्॥२॥कदाचिज्ज्वररूपाव्याप्तःपुत्रहीनःसुदुःखितः॥कृत्वाव्रतानि
बहूश्योदानानिचयथाविधि॥३॥नलेभेसंततिंपितृऋणमुक्तिकरींपदा॥तदैवपातोगहनंप्राणा
न्त्यक्तुंमहद्वने॥४॥सनिद्राहाररहितोविशुष्कोभून्तदाद्विजः॥चतुर्थेदिवसेप्राप्तेमूर्च्छितःपतितो
वने॥५॥कारुण्यादेवभगवान्ज्ञात्वातस्यापिनिश्चयं॥द्विजरूपंसमासाद्यतमुत्थाप्यवचोब्रवी
त्॥६॥ब्राह्मणउ०॥कोसित्वंकुतआयातःकिमर्थंम्रियसेद्यसत्॥वाक्यंतदात्तगृहीत्वावृत्तांतंतस्य
वेदयेत्॥७॥श्रुत्वैवपुनरूचेतंद्विजस्तंजनार्दनः॥सर्वेस्वभुवनेगच्छव्रतंकुरुसमयोदितं॥८॥ज्येष्ठेमा
सेतुसंप्राप्तेप्रातःस्नानंदिनेदिने॥कुरुष्वब्रह्मचर्येणहविर्भुक्नियतेंद्रियः॥९॥त्रिविक्रमंसमभ्य
र्च्येद्दधिभक्तंसमर्प्यच॥जलैःसंसिंच्यवृक्षादीन्ब्राह्मणानांगृहेगृहे॥१०॥एवंकृतेद्विजःश्रेष्ठभा
विपुत्रोनसंशयः॥उक्त्वैवंतर्हितोजातःसद्विजोऽद्भुतदर्शनः॥११॥तद्वाक्यंगुणसंपन्नंनिश्चित्यप्रय
योगतः॥तद्व्रतंकर्तुमुद्युक्तोब्राह्मणस्त्रियासह॥१२॥प्रातःस्नानंकृतवतानिशांतेचदिनेदिने॥
कदाचिद्दैवयोगेनपुलिनेवृक्षसंकुले॥१३॥सरोवरेमहाघोरंव्याघ्रमेकंददर्शसः॥बुभुक्षितद ३२

वाग्रर्थंतस्यांतिकमथाययौ॥१४॥भयव्याकुलितःसोपिजलेचात्मानमक्षिपत्॥तस्यांतुकुणिकास्प
र्शाद्दिव्यदेहोबभूवह॥१५॥सउवाचप्रसन्नात्माधन्योहंतवदर्शनात्॥महादोषाश्चगतासर्वेमुक्तोहंतवद
र्शनात्॥१६॥पुण्यंकरोषियत्किंचित्तद्देहिमदनुग्रहात्॥एवमुक्तस्तदातेनव्याघ्रेणद्विजपुंगवः॥१७॥ददौ
मासकृतंपुण्यंततःस्वर्लोकमागतः॥पुनश्चकारविप्रोपितद्व्रतंमहदद्भुतं॥१८॥तस्यपुण्यप्रभावेनजातः
पुत्रोमहौजसः॥तदातद्वचनंतथ्यंमेनेब्राह्मणकुलोद्भवः॥१९॥स्कंदउ०॥एतत्स्नानस्यमाहात्म्यंकथितंवो
द्विजोत्तमाः॥परंतुकुणिकास्पर्शान्मुक्तःपरमहिंसकः॥२०॥द्विजोपितनयंप्राप्तोवैष्णवंविष्णुसंनिभं॥
पुनःकिंश्रोतुमिच्छाथोतत्सर्वंकथयामिवः॥२१॥इतिश्रीभविष्यपुराणेज्येष्ठमाहात्म्येअष्टाविंशोध्यायः
॥२८॥ ॥श्रीः॥ऋषयऊचुः॥ज्येष्ठेस्नानस्यमाहात्म्यश्रवणस्यचयत्फलं॥विस्तरेणततोब्रूहिपुराणार्थ
विद्वंवर॥१॥सूतउ०॥शृण्वंतुऋषयःसर्वेज्येष्ठस्नानस्ययत्फलं॥यत्कृत्वामुच्यतेजंतुःत्रिविधादपिपा
तकात्॥२॥वृषभस्थेसवितरिज्येष्ठस्नानंकरोतियः॥मासमेकंव्रतंचैवतस्यपुण्यफलंमहत्॥३॥
ज्येष्ठस्नानंप्रकर्तव्यंयावन्नोदितेरवौ॥ज्येष्ठेमासामाद्रेमुदकेसर्वतीर्थफलंलभेत्॥४॥तत्रसर्वाणितीर्था

ज्ये॰ १२

नि गंगारी। निवसंति हि ॥ तावत्स्नानं प्रकर्तव्यं पापघ्नामादिकं भवेत् ॥५॥ नद्यंपतिस्नानमासे पानि स्नानमा
त्रेण भो द्विजाः ॥ अतः स्नानं प्रकर्तव्यं ज्येष्ठे मासे नरोत्तमैः ॥६॥ ईर्षपार्श्वैवलोभेन सेव्यपापा समागमा
त् ॥ हठाल्लोभात्कामनाद्वा निमित्तेन यदृच्छया ॥७॥ भीत्या च रवशेनापि कर्तव्यं च स्वशक्तितः ॥ क
लौ तु पापबाहुल्यात् ज्येष्ठे स्नानं सुदुर्लभं ॥८॥ यमेन गोपितं भीत्या प्रार्थयित्वाति विक्रमं ॥ विप्रानि
संभवं तीक्ष्णस्वल्पपुण्यवतामिह ॥९॥ ऋषय ऊ॰ ॥ यमेन मासमाहात्म्यं गोपितं केन हेतुना ॥ विप्रा
नि कुरुते कस्मात् ज्येष्ठे पुण्यवतां नृणां ॥१०॥ एतत्कौतूहलं श्रोतुमिच्छामि ह्यदूरस्वनः ॥ सूत उ॰ ॥
अत्रार्थे कथये विप्रा इतिहासं पुरातनं ॥११॥ तत्कृत्वा मयता गच्छेत् संशयो हृदि संस्थितः ॥ पुरा माहि
ष्मतिपुरे ब्राह्मणो कृष्णकाभिधः ॥१२॥ सर्वविद्यापरिभ्रष्टो मूर्खो निंदापरायणः ॥ कृषिकर्मकरो नि
त्यं क्रयविक्रयकारकः ॥१३॥ अनेकव्यवसायेन कुटुंबोदरपूरकः ॥ तथापि नाभवत्तृप्तिः कुटुंबस्य दु
रात्मनः ॥१४॥ जघान पाथिकान्मार्गे कुटुंबोदरपूर्तये ॥ तथापि नाभवत्तृप्तिः चौर्यं कुर्वन् द्विजाध
मः ॥१५॥ एवं प्रतिदिने कुर्वन्माहिष्मत्यां द्विजाधमः ॥ कस्मिंश्चित्समये दृष्टो धर्तृतैर्ग्रामवासिभिः ॥ २१

॥१६॥ बबंधुस्ताडयामासुर्बहिर्निष्कासितो पुरात् ॥ उवास कतिचित्कालं अरण्ये ग्रामसंन्निधौ ॥१७
निशायां गृहमागत्य पुनरेव वनं ययौ ॥ अरण्ये श्वापदान् हत्वा भक्षयामास निर्घृणः ॥१८॥ एवं प्रकु
र्वतस्तस्य कालो बहुतरो गतः ॥ कालेन बहुना राजन् ज्येष्ठमासः समागतः ॥१९॥ निशीथे कनकौर
ण्या दागत स्वगृहं प्रति ॥ आहार वस्त्रालंकारान्पुनर्गतु वनं ययौ ॥२०॥ मार्गे ददर्श सरितं कृतास्नानं
गृहं ययौ ॥ ~~मार्गे ददर्श सरितं कृता स्नानं गृहं ययौ ॥२१॥~~ अन्ततां ज्येष्ठमासस्य स्नानं जातं द्विजन्म
नः ॥२१॥ प्रसहं गृहमागत्य स्तेयेनापादितं वसु ॥ गृहीत्वा वनमायाति सदा स्नाति दिने दिने ॥२२॥
एवं मासो गतस्तस्य स्नानतो ज्ञानतस्सदा ॥ ज्येष्ठशुक्लचतुर्दश्यां निशीथे च द्विजाधमः ॥२३॥ आ
हारधनवस्त्राणि बध्वा ग्रंथिं बहिर्ययौ ॥ तावत्प्रभातसमये दृष्ट्वा लोकानितस्ततः ॥२४॥ पलायनप
रो भूत्वा सरित्तीरमुपाययौ ॥ तत्रापि च जनान् दृष्ट्वा पौर्णिमास्नानमागतान् ॥२५॥ तस्करेति वदन् लो
को नरस्ततैः समुपागतः ॥ सोपि मार्गेण सरितं मुंचितुं त्वरयापययौ ॥२६॥ पृष्ठे काष्ठैश्च पाषाणैस्ताड
यामासुरंतिकं ॥ धावाशिरसितं भारमगाधे पयसि स्थितः ॥२७॥ पपात पयसि तस्मिन् पंचत्वं समु

ज्येष्ठ
३४

पागतः॥ वैकुंठादागतं दिव्यं विमानं सूर्यवर्चसं ॥२८॥ किमिदं किमिदं चेति विस्मिताः सकला जनाः ॥ त
त्रस्थैः पुरुषैः किंचित्पृष्टो नीतोऽजलाद्बहिः ॥२९॥ कनकोयं द्विजोअस्योस्माभिग्रीमाद्बहिष्कृतः ॥
तत्क्षणात्परमं रूपं संप्राप्तो कनको द्विजः ॥३०॥ सावेमानास्ततोदूतानेतुंप्राप्ताद्विजाधमं ॥ दिव्यं विमा
नमास्थाप्य वैकुंठं गंतुमुत्सुकान् ॥३१॥ जनाऊ०॥ केन पुण्येन संप्राप्तं वैकुंठाद्यानमागतं ॥ दूताऊचुः॥
अज्ञाता ज्येष्ठमासस्य स्नानं प्राप्तं सुदुर्लभं ॥३२॥ दिव्यं विमानमारुह्य वैकुंठ भुवनं गतः ॥ स्वरूपतां भग
वतो संप्राप्तो कनको द्विजः ॥३३॥ तच्छ्रुत्वा परमं दुःखं प्राप्तः संयामिनीपतिः ॥ गोपयामास माहात्म्यं संप्रा
र्थ्य जगतां पतिं ॥३४॥ इत्येतत्कथितं विप्रा ज्येष्ठस्नानफलं द्विजाः ॥३५॥ इति श्रीभविष्यपुराणे ज्येष्ठमाहा
त्म्ये एकोनत्रिंशोध्यायः ॥२९॥ ॥छ॥ सूत उ०॥ श्रुत्वा तु ऋषयः सर्वे माहात्म्यं ज्येष्ठसंभवं ॥ पुनः सर्वे
पप्रच्छुस्ते श्रुतं ज्येष्ठस्य यत्फलं ॥१॥ सूततस्यजनमहाप्राज्ञ श्रवणस्य च यत्फलं ॥ तथा दानस्य यज्ञस्य ज
पस्य तपसः फलं ॥२॥ सूत उ०॥ सर्वदानेषु यत्पुण्यं सर्वतीर्थेषु यत्फलं ॥ यत्फलं जपयज्ञेन माहात्म्य ३४
श्रवणेन तत् ॥३॥ माहात्म्यं सकलं श्रुत्वा न पुनर्जन्मभाग्भवेत् ॥ समग्रं पातद्दं वा तदर्धं पात

ज्येष्ठ
३५

त्पुरवरे रम्ये बहूना धनमाहरत् ॥ अथात्र दैवयोगेन शुक्रमासः समागतः ॥१७॥ तत्र नागरि
काः सर्वे शुक्रस्नानार्थमुद्यताः ॥ बलिपूजां समागृह्य गोमत्यां यपुरन्वहं ॥१८॥ तत्र स्नात्वा जपं कृ
त्वा ययुस्ते विष्णुमंदिरं ॥ तत्र सर्वे समागम्य पारी कृत्वा द्विजोत्तमं ॥१९॥ पूजयित्वा यथाशक्त्या व
स्त्रालंकरणादिभिः ॥ माहात्म्यं श्रवणं तत्र चक्रुर्ज्येष्ठस्य सादरं ॥२०॥ यामद्वयं तत्रास्थित्वा पश्चाज्ज
ग्मुर्द्विजालयं ॥ एवं दिनेषु गच्छत्सु कदाचित्स द्विजाधमः ॥२१॥ स्तेयं कर्तुं समुद्युक्तः सोपि पातिनि
रंतरं ॥ गृहस्थानसमायुक्तः कर्तोप्यामि निश्चितमत् ॥२२॥ न लेभेवसरं तत्र गतास्तु बहुवासराः ॥अ
द्य श्वो वा हरिष्यामि वस्त्रालंकरणानि च ॥२३॥ एवमरतमानस्य आगता पोर्णिमा शुभा ॥ तस्यां तु
मुत्सुकाः सर्वे कृत्वा स्नानादिकाः क्रियाः ॥२४॥ तथा पुराणश्रवणं कृत्वा व्याससस्य पूजनं ॥ वस्त्रालं
करणैर्दिव्यैः परैस्तांबूलसंयुतैः ॥२५॥ संतोषस्वभवनत्रैह दृष्ट्वा दस्युर्व्यचिंतयत् ॥ अद्याहं घातइ
ष्यामि व्यासं तु द्रविणेच्छया ॥२६॥ अस्य सर्वं हरिष्यामि ममेदं दैवचोदितं ॥ इति निश्चित्य मनसि
स्वयं तत्र समागतः ॥२७॥ पौराणिकं समभ्यर्च्य दंडवत्पतितो भुवि ॥ अकिंचनोहं हे विप्रस्त्वं तव कुले ३

३५

दर्धकं॥४॥अध्यायंवातदर्धंवाश्लोकंश्लोकार्धमेववा॥यःशृणोत्सरस्याभक्त्यातस्यपुण्यमनंतकं॥५॥
श्रवणंयेचकुर्वंतितेषांविघ्नाभवंतिन॥तस्मात्सुपुण्यंप्रकर्तव्यंनरैर्विघ्नोपशांतये॥६॥यदिविघ्नंसमा
यातिस्नानेश्रवणकर्मणि॥विघ्नानिनाशमायांतिअसत्सुपुण्यकर्मणा॥७॥बहूनिसंतिपुण्यानि
कलौप्रोक्तानियानिच॥तेषुश्रेष्ठतमंप्रोक्तंपुराणश्रवणंकलौ॥८॥गोघ्नःकृतघ्नोब्रह्मघ्नःपितृघा
तकमातृहा॥मद्यपीस्वर्णस्तेयीचयश्चविश्वासघातकः॥९॥तेसर्वेप्रतिमुच्यंतेपुराणश्रवणात्कलौ
॥पुराणश्रवणंकार्यंबालवृद्धातुरैरपि॥१०॥निष्कामैश्चसकामैश्चउत्तमामधमाधमैः॥पुराणश्र
वणंकार्यंस्त्रीशूद्रैःपतितैरपि॥११॥नरस्तत्फलमवाप्नोतियथामनसिनिश्चितं॥अकामेनसकामे
नआस्थयावाप्यनास्थया॥१२॥स्पर्द्धयाकपटेनापिनिस्पृहेनस्पृहावता॥पुराणश्रवणेनैवप्राप्नु
वंतिमनोरथान्॥१३॥अभक्त्याश्रवणेनापिधुतिनिष्ठोदिवंगतः॥अत्रार्थेकथयिष्यामिकथांपापा
पप्रणाशिनीं॥१४॥द्वारावत्यांपुराकश्चिद्देवशर्माद्विजाधमः॥ब्रह्मकर्मपरिभ्रष्टोसर्वदाप्रेतकर्मकृत्॥
॥१५॥सर्वदादुष्टकर्माणिचकारोपिनकिंचन॥लेभेकुटुंबवाहार्थंदस्युवृत्तिंचकारसः॥१६॥तस्मि

वरं॥१९॥दासोयमितिमांमत्वासेवांकर्तुंयथासुखं॥सर्वेभ्योप्यधिकांभक्तिंदर्शयामासकृत्रिमां॥
२०॥ततोविनिर्गताःसर्वेयातेस्तंतिग्मतेजसि॥तत्रावसिष्टोद्वौतत्रधूर्तःपौराणिकस्तथा॥२
ततःपौराणिकोराजन्समाकर्षन्द्रुतंस्ततः॥ग्रंथिंबध्वाददौतस्यमस्तकेवसुमुत्तमं॥२१॥त
नम्रशिरोज्ञातोहृष्यमानोमुहुर्मुहुः॥एवंविनिर्गतोमार्गेतदादिष्टंव्यचिंतयत्॥२२॥तते
द्रुमार्गेपितेनसाकंययौशनैः॥हट्टेचैवजनाकीर्णेपलायनपरोभवत्॥२३॥तदैवप्रस्खलन्म
कूपेनिरुदकेपतत्॥नापश्यन्तंयदाविप्रोतदैवाकुलितोभवत्॥२४॥कोलाहलःकृतस्तेनसर्वे
तत्रसमागताः॥अहोतेनैवधूर्तेनहृतंसर्वाखिलंमम॥२५॥दुर्भाग्योहंमंदबुद्धिर्विश्वस्तोस्मि
कथंजनाः॥अविज्ञातेप्रबंधेचविश्वसंतिनराधमाः॥२६॥मद्धूर्तेनाशमायांतिविडालेमूषको
यथा॥एवंतद्वचनंश्रुत्वापौराराजानमब्रुवन्॥२७॥राज्ञासर्वान्समाहूयइदंवचनमब्रवीत्॥
पुरद्वारेषुकीलानिसर्वैःस्थिरसाइतस्ततः॥२८॥ब्राह्मणाप्यंतरेश्चैवचारान्संप्रेषयन्नृपः
॥वनेपातालश्चकतिचिद्विचक्रुर्दस्यो[illegible]शोधनं॥२[illegible]ततःसमुदितेभानौदूतान्वेषणतस

रा:॥ कूपांते ददृशुः केचित्केचिद्द्रोणौ नभश्चिर[illegible]॥ कूपान्निष्कासितस्तूर्णं प्राणत्रोणान्नृपाज्ञ
या॥ गतप्राणं च तं दृष्ट्वा तदाग्नौ ते विनिक्षि[illegible]न्॥४१॥ दिव्यदेहधरो भूत्वा विमानवरमाश्रितः
॥ तान्वीरान्प्रणनामाशु अयं भवदनुग्रहः॥४२॥ ततस्ते विस्मिताः सर्वे महिमानं प्रतुष्टुवुः॥
ययौ वैकुंठनिलयं महात्म्यश्रवणात्तदा॥४३॥ स्कंद उ०॥ एतन्मयापि गदितं माहात्म्यश्रवण
स्य च॥ पुराणश्रवणस्यापि अभक्तस्यापि या गतिः॥४४॥ किं पुनर्भक्तिभावेन शृण्वतां भाग्य
मुत्तमं॥ येन कुर्वंति वै मोहात्तस्य च शात्रस्याप्यास पूजनं॥४५॥ दरिद्रा रोगिणश्चैव ते भवंति न संश
यः॥ पुराणं ग्रंथं च निंदंति तथा चैव कथानकं॥४६॥ ते मूर्खा बधिराश्चांधा पंगवश्च भवंति वै॥
एवं श्रुत्वा स्कंदमुखात्सर्वे तास्ते च द्विजोत्तमाः॥४७॥ ववर्षुः पुष्पवृष्टीभिः षडास्यं नंदनो द्रुमापा
न्ननृतुश्च पुरः केचित्प्रजपुश्चोपचारकैः॥ मुमुदिरे ऋषिवरा माहात्म्यज्येष्ठसंभवं॥ श्रसा॰तृ॥
ष्टुस्ते सर्वे माहात्म्यं च पुनः स्तुवि:॥४९॥ इति श्रीभविष्यपुराणे ज्येष्ठमाहात्म्ये अंबरिषना ३
रदसंवादे फलश्रुतिवर्णनं नाम त्रिंशोध्यायः॥३०॥ ॥श्री॥ संपूर्णमस्तु॥ ॥स्वस्ति

```
[OrderDescription]
,CREATED=22.07.19 10:24
,TRANSFERRED=2019/07/22 at 10:36:44
,PAGES=35
,TYPE=STD
,NAME=S0001057
,Book Name=JYESHTHMAHATMAY BHAVISHYPURANE PART 3-30
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
```

,FILE35=0

,